Seer – Parashara, Devata or subject–Agni, Metres–Trishtup and Pankti of various kinds. Tunes-Dhaivata and Panchama.

अथ मनुष्याणां वेदाध्ययनाध्यापनाभ्यां किं किं फलं भवतीत्युपदिश्यते ।

What is the fruit of studying and teaching the Veda is taught in the first Mantra.

Mantra—1

नि काव्या वेधसः शश्वतस्कर्हस्ते दधानो नर्या पुरूणि ।
अग्निर्भुवद्रयिपती रयीणां सत्रा चक्राणो अमृतानि विश्वा ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

यः अग्निः इव विद्वान् मनुष्यः या नि वेधसः परमात्मनः सकाशात् प्रकाशितानि पुरूणि सत्रा अमृतानि विश्वा नर्या काव्यानि सन्ति तानि दधानः विद्याप्रकाशं चक्राणः सन् धर्माचरणं निकः (निश्चयेन करोति) स रयीणां रयिपतिः भुवत् (भवति) ॥

TRANSLATION

A learned person who is splendid like fire and who holds in his hands (so to speak) or realises the import of the four Vedas Holy-Kavyas (Divine Poetical Scriptures) revealed by the Eternal Omnicient Creator which are beneficial to all mankind, eternal and revealers of perfect Truth, Imperishable and leading towards the attainment of salvation

and other objects of life, becomes the lord of wealth in the form of wisdom and good vast government etc. and spreading the Light of Knowledge and deciding the righteous conduct [Dharma] on the basis of the Holy Vedas.

PURPORT

O men, God who is Omniscient and Eternal has revealed eternal Holy Vedas for your benefit. Attain Dharma (righteousness) Artha (Wealth) Kama (fulfilment of noble desires) and Moksha (liberation) by studying and teaching them and by becoming learned and righteous.

THE COMMENTATOR'S NOTES

(वेधसः) सकलविद्याधातुर्विधातुः

= Of God who is Omniscient.

(सत्रा) नित्यानि सत्यार्थप्रतिपादकानि

= Eternal and revealers of all Truth.

(अग्निः) विद्वान् अग्निरिति पदनाम (निघ० ५.४)

TRANSLATOR'S NOTES

पद-गतौ गतेस्त्रयोऽर्थाः ज्ञानं गमनं प्राप्तिश्च अत्र ज्ञानार्थग्रहणम् सत्रा इति सत्यनाम (निघ० ३.१०)

This Mantra clearly shows that the Vedas are and claim to be the Eternal Divine Revelations and it gives a lie to the view of Muir and most other Western Scholars who say that the Theory of the Vedic Revelation is not found in the Vedas themselves.

ये एतान् स्वीकुर्वन्ति ते सदानन्दा भवन्ति ये च नाधीयते ते वृथाश्रमा भवन्ति इत्युपदिश्यते ।

Those who accept the Vedas and study them, enjoy bliss and those who do not study them waste their labour is taught in the second mantra.

Mantra—2

अस्मे वत्सं परि षन्तं न विन्दन्निच्छन्तो विश्वे अमृता अमूराः ।
श्रमयुवः पदव्यो धियंधास्तस्थुः पदे परमे चार्वग्नेः ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

ये विश्वे अमृताः अमूराः श्रमयुवः पद्व्यः धियन्धाः मोक्षम् इच्छन्तः (मनुष्याः) अस्मे वत्सं सन्तं (वेदचतुष्टयं) परिविन्दन् ते अग्नेः चारु परमे पदे तस्थुः (ये च न विदुः ते तद् ब्रह्मपदं नाप्नुवन्ति) ॥

TRANSLATION

Those immortal and liberated souls who are free from ignorance, industrious, who have attained happiness and who are intelligent and active, desiring liberation acquire the knowledge of the four Vedas which was everywhere around and which enables us to dwell in true delight. They thus stayed in the charming, most exalted worth-attaining nature of God (consisting of Absolute existence, consciousness and Bliss.) Those who do not know the Vedas, can not attain that God.

PURPORT

All souls are eternal, Among them the embodied are thus addressed by God. O men, you should study and teach the Vedas and then being freed from ignorance and becoming wise and industrious, you should enjoy happiness. None can acquire the knowledge of all sciences, without studying the Vedas, therefore you should spread the knowledge of the Vedas all around or everywhere.

THE COMMENTATOR'S NOTES

(वत्सम्) सुखेषु निवासयन्तं व्यक्तवाचं प्रसिद्धं वेदचतुष्टयं अत्र वृत्...(उणादि कोषे ३.६१) इति सूत्रेणास्य सिद्धिः।
=The four Vedas which enable us to dwell in happiness.

(पद्व्यः) सुखं प्राप्ताः = Happy.

(अग्नेः) परमेश्वरस्य = Of God.

TRANSLATOR'S NOTES

(पद्व्यः) पद-गतौ गतेस्त्रयोऽर्थाः ज्ञानं गमनं प्राप्तिश्च

वी-गति व्याप्तिप्रजनकान्त्यसनखादनेषु, क्विप्

(अग्निः) अग्निरिति पदनाम (निघ० ५.४) पद्-गतौ अत्र ज्ञानार्थग्रहणम् ॥
= Of Omniscient God.

(श्रमयुवः) श्रमेणयुक्ताः। अत्र क्विवचिप्रच्छिश्रिस्रुद्रु प्रुज्वां दीर्घोऽसम्प्रसारणंच (उणा० २.५८) इति क्विब्दीर्घौ भवतः = Irdustrious.

पुनस्तं किमर्थमधीयीरन्नित्युपदिश्यते।

Why should men study the Vedas is taught further in the third mantra.

Mantra—3

तिस्रो यद॑ग्ने श॒रद॒स्त्वामिच्छुचिं॑ घृ॒तेन॒ शुच॑यः सप॒र्यान्।
नामा॑नि चिद्दधिरे य॒ज्ञिया॒न्यसू॑दयन्त त॒न्वः॑ सु॒जा॑ताः ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे अग्ने ! यत् (ये) शुचयः सुजाताः मनुष्याः शुचिं त्वां तिस्रः शरदः सपर्यान् ते इत् यज्ञियानि नामानि दधिरे चित् (अपि) घृतेन तन्वः (तनूः) असूदयन्त ॥

TRANSLATION

O learned man, Those pure and famous persons on account of their knowledge (theoretical and practical), who serve thee that art pure for three years, uphold the actions that enable them to acquire knowledge, meditate and perform noble deeds and then develop their bodies with proper use of the water and ghee [clarified butter].

PURPORT

No can get true knowledge without the study of the Vedas. Without knowledge, it is not possible for any one to make human life fruitful and to obtain purity. Therefore all men should study the Vedas well.

THE COMMENTATOR'S NOTES

(यज्ञियानि) कर्मोपासनाज्ञानसम्पादनार्हाणि कर्माणि ॥

= Noble deeds that enable one to have pure acts, meditation and knowledge.

(असूदयन्त) संचालयेयुः = Direct

(सुजाताः विद्याक्रियासुकौशले सुष्ठु प्रसिद्धाः

= Famous in knowledge, arts and industries.

(घृतेन) आज्येन उदकेन वा = With Ghee or water.

TRANSLATOR'S NOTES

घृतम् इति उदकनाम (निघ० १.१२) घृ-क्षरणदीप्त्योः

So it stands for the Ghee or clarified butter also.

वेदानामध्येतारः कीदृशा भवेयुरित्युपदिश्यते ।

How should be the scholars of the Vedas is taught in the fourth Mantra.

Mantra—4

आ रोदसी बृहती वेविदानाः प्र रुद्रिया जभ्रिरे यज्ञियासः ।

विदन्मर्तो नेमधिता चिकित्वानग्निं पदे परमे तस्थिवांसम् ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

ये रुद्रियाः वेविदानाः यज्ञियासः (विद्वांसः) बृहती रोदसी आजभ्रिरे सर्वा विद्याः विदन् तेषां सकाशात् (विज्ञानंप्राप्य) यः चिकित्वान् नेमधिता मर्तः परमे पदे तस्थिवांसम् अग्निं प्रविदत् (स सुखी जायते) ॥

TRANSLATION

That man becomes happy who having received education from the brave great scholars, experts in performing Yajnas (non-violent sacrifices) or knowers and supporters of the vast heaven and the earth, well-versed in all sciences, becomes a great scholar,possessing the knowledge of all objects and knows God endowed with the most excellent attributes.

PURPORT

Men should receive the knowledge of the Vedas from the Vedic Scholars observing well-prescribed rules and regu-

lations and after knowing God and His creation should give that knowledge to others.

THE COMMENTATOR'S NOTES

(रुद्रियाः) शत्रून् दुष्टान् रोदयतां सम्बन्धिनः
= Brave destroyers of wicked enemies.

(नेमधिताः) नेमाः प्राप्ताः पदार्था धिताहिता येन सः अत्र सुधितवसुधितनेमधितधिष्वधिषीय च (अष्टा० ७. ४. ४५) इति छन्दसि निपातनात् क्तप्रत्यये हित्वं प्रतिषिध्यते। सुपां सुलुक् इति सोः स्थाने अकारादेशः।
= Possessing the knowledge of all objects.

(पदे) प्राप्तव्ये गुणसमूहे = In the attributes that are to be attained.

अग्निम् परमेश्वरम् = God.

(पद-गतौ गतेस्त्रिष्वर्थेषु प्राप्त्यर्थग्रहणमत्र) ।।
= Among the three meanings of गति the third meaning of attainment has been taken here). Tr.

पुनः ते कीदृशा भवेयुरित्युपदिश्यते ।

How should they (the Scholars of the Vedas) be is taught further in the fifth Mantra.

Mantra—5

संजानाना उप सीदन्नभिज्ञु पत्नीवन्तो नमस्यं नमस्यन् ।
रिरिक्वांसस्तन्वः कृण्वत स्वाः सखा सख्युर्निमिषि रक्षमाणाः।।

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

ये संजानाना उप सीदन्नभिज्ञु पत्नीवन्तः (धर्मविद्ये) रक्षमाणाः (अधर्मात्) रिरिक्वांसः विद्वांसः अभिज्ञु उपसीदन नमस्यन् निमिषि सख्युः सखा इव स्वाः तन्वः कृण्वत (ते भाग्यशालिनो भवन्ति) ।

TRANSLATION

Fortunate are those learned persons who being enlightened, having noble educated wives, preserving Dharma (righteousness) and knowledge and keeping themselves away from all un-righteousness, paying reverential adoration to the Adorable God and the learned wise preceptor with bended kneess, in dealings of competition for the supremacy in knowledge, like friends, make their bodies healthy and strong.

PURPORT

None can get the happiness and knowledge without honouring God and learned persons. Therefore only respectable persons should be respected and none others.

THE COMMENTATOR'S NOTES

(रिरिक्वासः) अधर्माद् विनिर्गताः । अत्र न्यंक्वादित्वात् कुत्वम् ॥

= Free from all evil or un-righteousness.

(निमिषि) विद्याधिक्याय स्पर्धिते सन्तते व्यवहारे

= In dealings of competition for the supremacy of knowledge.

TRANSLATOR'S NOTES

रिरिक्वांसः is derived from रिच्-वियोजनसंपर्चनयोः (चुरा) or रिचिर्-विरेचने = Separating themselves, निमिषि is derived from मिषस्पर्धायाम् (तुदा०) hence the above meaning of विद्याधिक्याय स्पर्धिते सन्तते व्यवहारे । as given by Rishi Dayananda Saraswati.

एते विद्यया किं विदित्वा वर्तन्त इत्युपदिश्यन्ते ।

What knowledge do they gain and how do they behave is taught further in the sixth Mantra.

Mantra—6

त्रिः सप्त यद्गुह्यानि त्वे इत्पदाविदन्निहिता यज्ञियासः ।
तेभी रक्षन्ते अमृतं सजोषाः पशूञ्च स्थातॄञ्चरथं च पाहि ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे मनुष्याः! यथा ते यज्ञियासः यत् (यानि) निहिता गुह्यानि सप्त पदानि त्रिः अविन्दन् (तथा त्वम् अपि एतानि लभस्व)। हे जिज्ञासो! यथा एते सजोषाः तेभिः अमृतं पशून् चाद् भृत्यादीन् स्थातृन् चाद् राज्यरत्नादीन् चरथं जंगमं चात् पुत्रकलत्रादीन् रक्षन्ते तथा एतानि त्वम् इत् पाहि ॥

TRANSLATION

O men, as those respectable persons experts in performing Yajnas, know the worth-preserving four Vedas with their Angas and Upangas (branches and subsidiaries) along with arts and industries, sciences and labour with three means of hearing, reflection and meditation find out their secrets, in the same way, you should also do. O seeker after truth, as these wisemen loving and serving one another, protect the nectar of Dharma (righteousness) Artha [wealth] Kama [noble desires] and Moksha [enancipation] animals and ignorant persons, immovable property like kingdom and jewels etc. and men, wives and children etc. so you should also do.

PURPORT

Men should always imitate the learned persons and not the ignorant. As good men are always engaged in doing noble deeds and giving up ignoble acts, others also should do like wise.

THE COMMENTATOR'S NOTES

(त्रिः) त्रिवारं श्रवण मननिदिध्यासनैः

= Thrice i. e. by hearing, reflecting and meditating

(सप्त) सांगोपांगान् चतुरो वेदान् त्रीन् क्रियाकौशल-विज्ञानपुरुषार्थान्

= Seven-Four Vedas with their branches & subsididries along with arts and industries, science and exertion.

(अमृतम्) धर्मार्थकाम मोक्षाख्यम् अमृतसुखम्
=The happiness of nectar in the form of Dharma [righteousness] Artha [wealth] Kama [noble desire] and Moksha [enancipation or liberation].

(गुह्यानि) गुप्तानि-सम्यक् स्वीकर्तव्यानि
= Worth preserving or accepting.

पुनरीश्वरगुणा उपदिश्यन्ते ।

The attributes of God are taught in the seventh Mantra.

Mantra—7

विद्वा अग्ने वयुनानि क्षितीनां व्यानुषक्छुरुधो जीवसे धाः।
अन्तर्विद्वां अध्वनो देवयानानतन्द्रो दूतो अभवो हविर्वाट् ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे अग्ने ! यतः अन्तः विद्वान् बहिः विद्वान् अतन्द्रः हविर्वाट् त्वं क्षितीनां वयुनानि जीवसे शुरुधः आयुषक् विधाः देवयानान् अध्वसः दूतः अभवः (तस्मात् पूज्यतमः असि ॥

TRANSLATION

O God, Source of all true happiness, Thou being Omniscient, knowest all within [the minds of the beings] and without [their acts] and ever diligent and watchful, providest for the sustenance of men grief-alleviating good knowledge and food which give them happiness. Thou teachest [through the Vedas] the right path which all enlightened persons should follow. Therefore Thou art worthy of adoration.

PURPORT

(1) Why should not God be adored who when prayed to shows the path of righgeousness and thus gives happiness ?

(2) Why should not a wise learned man be respected who when served gives knowledge and thus makes people happy ?

THE COMMENTATOR'S NOTES

(वयुनानि) विज्ञानानि = Knowledge and act.

(शुरुधः) प्राप्तव्यानि सुखानि

= The happiness which should be attained or grief-alleviating.

(दूतः) विज्ञापकः = Teacher or Giver of knowledge.

(इविर्वाट्) विज्ञानादिप्रापकः

= Causing the attainment of knowledge etc.

TRANSLATOR'S NOTES

वयुनमितिप्रज्ञानाम (निघ० ३.९)

Therefore Rishi Dayananda Sarasvati has interpreted as विज्ञानानि दूतः is derived from दु-गतौ स्वा गतेस्त्रयोऽर्थाः गमनं प्राप्तिश्च। Taking the first and the third meaning Rishi Dayananda has interpreted it as विज्ञापकः It is noteworthy that both Prof. Wilson and Griffith translate the epithets used for Agni in the Mantra which are applicable only to an Omniscient Supreme Being.

For instance, Prof. Wilson translates विद्वां अग्ने वयुनानि क्षितीनाम् as "Agni who art cognizant of all things to be known." (Wilson).

अन्तर्विद्वां अध्वनो देवयानान् is translated by him as "Knowing the paths between (earth and heaven) by which they (gods) travel. (Wilson). Are such epithets applicable for the material fire ?

Griffith's translation of the first stanza is "Thou", Agni knower of men's works. The third stanza is translated by him as "Thou deeply skilled in paths of Gods." (Griffith).

Though the word देव as usual has been wrongly translated by both as "gods" or "Gods" which Rishi Dayananda has interpreted as विद्वांसः on the authority of विद्वांसो हि देवाः (शतपथ ३.७.३.१०) and other passages in the Brahmanas, their own translation clearly shows that Agni stands here for an Omniscient Supreme Being and not for inaminate material fire. Rishi Dayananda Sarasvati's interpretation is therefore correct.

पुनस्ते ब्रह्मविदो विद्वांसः कीदृशा भवन्तीत्युपदिश्यते ।

How are the knowers of God is taught further in the 8th Mantra.

Mantra—8

स्वाध्यो॑ दि॒व आ स॒प्त य॒ह्वी रा॒यो दुरो॒ व्यृ॑त॒ज्ञा अ॑जानन् ।
वि॒दद्गव्यं॑ स॒रमा॑ दृ॒ळ्हमू॒र्वं येना॒ नु कं॒ मानु॑षी॒ भोज॑ते॒ विट् ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे मनुष्याः ! यूयं यथा स्वाध्यः ऋतज्ञाः (विद्वांसः) येन यह्वीः सप्त दिवः रायः पुरः वि अजानन् येन सरमा मानुषी विट् दृढम् ऊर्वं गव्यं सुखं नु विदत् कं भोजते (तथा एव तत् कर्म सदा सेवध्वम्) ॥

TRANSLATION

O men as thinkers in their hearts of the welfare of all and knowers of truth, know the seven great doors to the wealth of wisdom which destroy all miseries and by which the learned people get abiding happiness that dispels defects and is beneficial to the senses and the cattle etc., you should also do such noble deeds.

PURPORT

It is the duty of men to impart good knowledge to all with honesty and strainght-forwardness without deceit of any kind, so that all may enjoy happiness.

THE COMMENTATOR'S NOTES

(स्वाध्यः) ये सुष्ठु सम्यक् सर्वेषां कल्याणं ध्यायन्ति ते । = Those who always think of or have at heart the welfare of all. (ध्यै-चिन्तायाम्) Tr.

(दिवः) विद्याः = Knowledge or wisdom.

(दुरः) दूर्वन्ति सर्वाणि दुःखानि यैः तान् विद्याप्रवेश-

स्थानद्वारान् = The doors of knowledge which destroy all miseries. (दृ-विदारणे)

(सरमा) या सरान् बोधान् मिमीते सा

= That which acquires knowledge-learned.

(ऊर्वम्) दोषहिंसनम्

= Destruction or removal of defects and evils.

उर्वी हिंसायाम् – (Tr.)

TRANSLATOR'S NOTES

There is no mention of the Ganga and other rivers in the Mantra, yet Sayanacharya takes यह्वी:=Great इति महन्नाम as seven rivers and Wilson translates it as seven pure rivers. By seven is meant here 5 senses of preception, mind and intellect which are doors to the wealth of wisdom or knowledge. सरमा is derived from सृ-गतौ Among three meanings of गति the first meaning of knowledge has been taken by Rishi Dayananda. माङ्-माने

पुनस्ते कीदृशा इत्युपदिश्यते ।

How are they (learned persons) is taught further in the ninth Mantra,

Mantra—9

आ ये विश्वा स्वपत्यानि तस्थुः कृण्वानासो अमृतत्वाय गातुम् ।
मह्ना महद्भिः पृथिवी वि तस्थे माता पुत्रैरदितिर्धायसे वेः ॥

सन्धिच्छेदसंहितोऽन्वयः (ऋषिकृतः)

यथा ये अमृतत्वाय गातुंकृण्वानासः विद्वांसः महद्भिः गुणैः सह विश्वानि स्वपत्यानि मह्ना धायसे पृथिवी इव पुत्रैः माता इव आतस्थुः अदितिः मूर्तान् पदार्थान् वेः इव आतस्थुः तथा एतत् अहं वितस्थे ॥

TRANSLATION

As learned men giving wisdom for the attainment of immortality or emancipation make all their good children endowed with great virtues, as the earth upholds all, a mother properly brings up her children, as the sky upholds birds etc. so do I try to uphold or support all.

PURPORT

It is the duty of all men to make their children endowed with good education and wisdom and enable them to attain (righteousness) (wealth) (noble desires) and (emancipation) like other wise learned persons.

THE COMMENTATOR'S NOTES

(गातुम्) बोधसमूहम् गातुरिति पदनाम (निघ० ४.१)
पद्-गतौ गतेंस्त्रिष्वर्थेषु अत्र ज्ञानार्थग्रहणम्
= Knowledge or group of teachings.

(अदितिः) द्यौः = Sky.
(अदितिर्द्यौरदितिरन्तरिक्षम् इति प्रामाण्यात्)
अदिती द्यावापृथिवीनाम (निघ० ३.३०)
अदितिरिति पृथिवीनाम (निघ० १.१)
पुनस्ते किं धरन्तीत्युपदिश्यते ।

What do the learned persons uphold is taught further in the tenth Mantra.

Mantra—10

अधि श्रियं नि दधुश्चारुमस्मिन्दिवो यदक्षी अमृता अकृण्वन् ।
अध क्षरन्ति सिन्धवो न सृष्टाः प्र नीचीरग्ने अरुषीरजानन् ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे अग्ने यथा यत्र ये अमृताः विद्वांसः अस्मिन् श्रियम् अधि निदधुः चारुं दिवः अक्षी अकृण्वन् सृष्टाः सिन्धवः न अध

सुखानि क्षरन्ति नीचीः अरुषीः प्रजानन तथा त्वम् अपि एतान निधेहि कुरु देहि प्रजानीहि ॥

TRANSLATION

O learned person : Immortal emancipated souls have established the beauty of wisdom, kingdom and prosperity in this world. They have made from their light of wisdom two eyes in the form of internal and external knowledge Like the flowing rivers, they spread happiness on all sides. They know acceptable sciences, and the various processes which cause happiness like the dawns. You should also do likewise and give knowledge to all.

PURPORT

O men, you should suitably accept the conduct of the learned and not that of the ignorant. As rivers cause happiness, so you should create happiness or delight for all.

THE COMMENTATOR'S NOTES

(दिवः) विज्ञानात् सूर्यप्रकाशाद् वा

= From wisdom or the light of the sun.

(अक्षी) अश्नुवते व्याप्नुवन्ति याभ्यां बाह्याभ्यन्तरविद्यायुक्ताभ्यां ते ।

= Eyes in the form of the internal or spiritual and external or material knowledge.

(अरुषीः) उषस इव सर्वसुखप्रापिका विद्याः क्रिया वा ।

= Sciences or various processes which cause all happiness like the dawns.

TRANSLATOR'S NOTES

अरुषाति उषोनाम (निघ० १.८)

It is derived from ऋ-गतिप्रापणयोः hence Rishi Dayananda Sarasvati's interpreation of सर्वसुखप्रापिका विद्याः क्रिया वा दिवः is from दिवु-क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु ।

Here the meaning of द्युति or light of wisdom or of the sun has been taken by Rishi Dayananda.

This hymn is connected with the previous hymn as it deals with God and the attributes of the enlightened persons.

Here ands the commentary on the seventy-second hymn or 18th Varga of the Rigveda.

अथ त्रिसप्ततितमं सूक्तम्

HYMN LXXIII, (73)

अस्य दर्शचस्य त्रिसप्ततितमस्य सूक्तस्य पराशर ऋषिः । अग्निर्देवता । १, २, ४, ५, ७, १० निचृत् त्रिष्टुप् छन्दः । ३, ६ त्रिष्टुप् । ८ विराट् त्रिष्टुप् छन्दः धैवतः स्वरः ॥

Seer–Parashara. Devata or Subject–Agni, Metre-Trishtup of various forms. Tune-Dhaivata.

अथ मनुष्यगुणा उपदिश्यन्ते ।

The attributes of a learned person are taught.

Mantra—1

रयिर्न यः पितृवित्तो वयोधाः सुप्रणीतिश्चिकितुषो न शासुः ।
स्योनशीरतिथिर्न प्रीणानो होतेव सद्म विधतो वि तारीत् ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे मनुष्याः ! यूयम् यः पितृवित्तः रयिः न वयोधाः सुप्रणीतिः चिकितुषः शासुः न स्योनशीः प्रीणानः अतिथिः न विधतः होता इव सद्म वितारीत् तं नित्यं भजत उपकुरुत वा ॥

TRANSLATION

O men, You should serve and ever do good to a learned person who is like the treasure known through the fatherly teachers, who is the supporter of life, whose conduct is excellent, who is like the preceptor of a highly educated person, who is always established in wisdom, rightenousness and exertion that cause happiness, who is like a cheerful benevolent guest roaming about to preach truth as distinguished from untruth, who increases the happiness in the house of the Yajamana (Performer of the Yajna) like the officiating priest.

PURPORT

It is not possible for any one to have realisation of wisdom and good education without knowledge, the observance of Dharma (righteousness) the association with the learned and good thoughts. None can be free from all doubts and delusions without the sermons of the wise highly learned guests going from place to place for preaching truth. Therefore all this must be done by all.

THE COMMENTATOR'S NOTES

(पितृवित्तः) पितृभ्यः अध्यापकेभ्यः वित्तः प्रतीतो विज्ञातः
= Knowledge through the teachers who are like fathers.

(शासुः) शासनकर्ता-उपदेष्टा
= Instructor or preceptor.

(स्योनशीः) यः स्योनेषु सुखेषु विद्याधर्म पुरुषार्थेषु शेते आस्ते सः = He who is established in wisdom, Dharma, (righteousness) and exertion.

(अतिथिः) महाविद्वान् भ्रमणशीलः उपदेष्टा परोपकारी मनुष्यः = A highly learned, benevolent pracher of truth as guest.

TRANSLATOR'S NOTES

(अत-सातत्यगमने)
स्योनमिति सुखनाम (निघ० ३.६)

Other commentators have translated पितृ वित्तः generally as Patrimonial Wealth (Wilson) Patrimonial riches. (Griffith) but Rishi Dayananda gives broader and more comprehensive meaning taking the word पितृ in the sense of father-like teachers.

पुनर्विद्वान् कीदृशः स्यादित्युपदिश्यते ।

How should a learned man be is taught further in the second Mantra.

Mantra—2

देवो न यः सविता सत्यमन्मा क्रत्वा निपाति वृजनानि विश्वा।
पुरुप्रशस्तो अमतिर्न सत्य आत्मेव शेवो दिधिषाय्यो भूत्॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे मनुष्याः ! यूयम् यः सविता देवः न सत्यमन्मा क्रत्वा विश्वा वृजनानि पाति पुरुप्रशस्तः अमतिः न सत्यः दिधिषाय्यः आत्मा इव शेवः भूत् (तं सेवित्वा विद्योन्नतिं कुरुत)॥

TRANSLATION

O men, you should ever increase your knowledge by serving a learned person who is like the divine Sun (dispeller of all darkness of ignorance) who knows the truth and preaches it, who by his actions preserves power of all kind, (Physical, mental and spiritual) who is excellent, truthful as well charming, upholder and nourisher of all and who is like soul the source of happiness.

PURPORT

Men can not attain the power of truth and knowledge and the beauty of happiness without the association of learned persons. Therefore they must be ever served.

THE COMMENTATOR'S NOTES

(सत्यमन्मा) यः सत्यं मन्यते विजानाति विज्ञापयति सः
= He who knows and preaches the Truth.

(अमतिः) सुन्दरस्वरूपः = Charming or beautiful,

(दिधिषाय्यः) धारकः पोषकः। दधातेर्द्वित्वमित्वं षुक् च (उणादि० ३.९५)
= Upholder or nourisher.

TRANSLATOR'S NOTES

Even Prof. Wilson translated the epithet used for Agni in this Mantra सत्यमन्मा as "who knows the Truth (of things)

Griffith's translation is "True-minded." Is this epithet applicable to the material fire ? Rishi Dayananda is therefore right in taking the word "Agni" here not for material fire but for a learned person as सत्यमन्मा,सत्य:, दिधिषाय्य: and other epithets clearly denote. Griffith is wrong in translating the word आत्मा as breath, while Prof. Wilson has correctlv translated it as soul.

पुनः स कीदृश इत्युपदिश्यते ।

How is Agni (God) is taught in the 3rd Mantra.

Mantra—3

देवो न यः पृथिवीं विश्वधाया उपक्षेति हितमित्रो न राजा ।
पुरःसदः शर्मसदो न वीरा अनवद्या पतिजुष्टेव नारी ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे मनुष्याः ! यूयम् यः देवः पृथिवीं न विश्वधाया हितमित्रः राजा न उपक्षेति पुरः सदः शर्मसदः वीराः न (दुःखानि शत्रून् विनाशयति) अनवद्यापतिजुष्टा इव (सुखे निवासयति) । तं सर्वदा समाहिता भूत्वा यथावत् परिचरत ॥

TRANSLATION

O men, you should always properly worship Giver of Divine Joy, God with devotion who supports us and keeps us together in our earthly life, who is the upholder of all like the sun, who is like the King friend of his subjects bringing about their welfare. Only those brave people are in the enjoyment of true and lasting happiness who feel that they are face to face with God. Those who serve God with an un-divided mind just like a very virtuous noble and beautiful educated wife of un-impeachable conduct devoted to her husband with her body, mind and soul enjoy the highest bliss.

PURPORT

Men cannot attain strength and happiness without true devotion to God and association with learned wisemen

devoted to Him. Therefore men should always be devoted to God and should honour learned devotees.

THE COMMENTATOR'S NOTES

(देवः) दिव्यसुखदाता = Giver of Divine Joy.

(अनवद्या) विद्या सौन्दर्यादिशुभगुणयुक्ता

= Endowed with knowledge beauty and other virtues.

(पतिजुष्टा) पतिः जुष्टः प्रीतः सेवितो यया तद्वत्

= Chaste wife devoted to her husband.

पुनः स कीदृश इत्युपदिश्यते ।

How is He (Agni) is taught further in the fourth Mantra.

Mantra—4

तं त्वा नरो दम आ नित्यमिद्धमग्ने सचन्त क्षितिषु ध्रुवासु ।

अधि द्युम्नं नि दधुर्भूर्यस्मिन्भवा विश्वायुर्धरुणो रयीणाम् ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे अग्ने (विद्वन्) त्वं रयीणां धरुणः विश्वायुः त्वम् अस्मिन् सहायकारीभव भूरिद्युम्नं धेहि तं नित्यम् इद्धं त्वा ध्रुवासु क्षितिषु ये नरः अधिनिदधुः दमे आ सचन्त (तान् त्वं सततं सेवस्व) ॥

TRANSLATION

O learned leader ! be thou the preserver of wealth in the form of knowledge, and good and vast Government and being-long lived be our helper of all happiness in this life and world. Give us much light of knowledge or wealth of good reputation. Serve those educated persons well who preserve and serve thee constantly kindled like fire in their dwelling free from miseries and in secure places.

PURPORT

O men, you should know that true happiness can be attained only by the communion with and knowledge of God who has created various objects in this world and by the association with the learned wise persons.

THE COMMENTATOR'S NOTES

(दमे) दुःखोपशान्ते गृहे ।

= In the dwelling free from misery.

(द्युम्नम्) विद्याप्रकाशंयशोधनं वा

= The light of knowledge or the wealth of good reputation.

TRANSLATOR'S NOTES

दम इति गृहनाम (निघ० ३.४)

दमु-उपरमे इति धातोः

द्युम्नम् इति धननाम (निघ० २.१०)

द्युम्नम् इति पदनाम (निघ० ४.२)

पद-गतौ गतेस्त्रिष्वर्थेषु ज्ञानार्थग्रहणम् द्युम्नं द्योततेः ।

तत् कृपा सङ्गाभ्यां सह मनुष्यैः किं किं प्राप्यत इत्युपदिश्यते ।

What is gained by God's grace and the association with the learned persons is taught in the fifth Mantra.

Mantra—5

वि पृक्षो॑ अग्ने॑ म॒घवा॑नो अश्यु॒र्वि सू॒रयो॒ दद॑तो॒ विश्व॒मायुः॑ ।

स॒नेम॒ वाजं॑ समि॒थेष्व॒र्यो भा॒गं दे॒वेषु॒ श्रव॑से॒ दधा॑नाः ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे अग्ने ! यथा अर्यः भागं मघवानः ददतः सूरयः समिथेषु देवेषु वाजं दधानाः श्रवसे पृक्षः विश्वम् आयुः च वि अश्युः तथा वयम् अपि वि सनेम ॥

TRANSLATION

O learned person giver of happiness ! As a trader enjoys his portion of wealth, may wealthy persons obtain abundant and good food, may the learned charitably disposed wisemen acquire long life. May we attain knowledge and

strength is battles (internal and external) for getting reputation among the enlightened persons.

PURPORT

Men can get all happiness with the help of God and learned persons and not otherwise.

THE COMMENTATOR'S NOTES

(पृक्षः) अत्युत्तमानि अन्नानि = Good food.
(सूरयः) मेधाविनः = Wise men.
(वाजम्) विज्ञानम् = Good knowledge.
(समिथेषु) संग्रामेषु समिथे इति संग्रामनाम (निघ० २.१७) = In battles.

TRANSLATOR'S NOTES

पृक्ष इत्यन्ननाम (निघ० २.७)

वाजम् is derived from वज-गतौ Among the three meanings of गति the first meaning of ज्ञान or knowledge has been taken here.

अथ विद्वद्गुणा उपदिश्यन्ते

The attributes of learned persons are taught further in the sixth Mantra.

Mantra—6

ऋतस्य हि धेनवो वावशानाः स्मदूध्नीः पीपयन्त द्युभक्ताः ।
परावतः सुमतिं भिक्षमाणा वि सिन्धवः समया सस्रुरद्रिम् ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे मनुष्याः ! यथा वावशाना स्मदूध्नीः धेनवः पीपयन्त यथा द्युभक्ताः किरणाः परावतः अद्रिं (मेघं) समया वर्षयन्ति सिन्धवः (नद्यः) च सस्रुः तथा यूयं सुमतिं भिक्षमाणाः विजानीत अन्येभ्यः ऋतस्य हि वर्षयत ॥

TRANSLATION

As the loving and splendid cows feed people with their full udders, as the rays of the sun coming from the distant sky make the cloud rain from near and as the rivers flow on, in the same manner, you should acquire wisdom soliciting good knowledge and shower truth on others like the rainy water.

PURPORT

The righteous scholars should be like the water purified by the Yajna which is invigorating and helpful in the attainment of good knowledge, being the source of good health.

THE COMMENTATOR'S NOTES

(ऋतस्य) मेघोत्पन्नजलस्य इव सत्यस्य ।
= Of the truth like the water produced by the cloud.

(अद्रिम्) मेघम् = Cloud.

(समया) सामीप्ये = Near.

TRANSLATOR'S NOTES

अद्रिरिति मेघनाम (निघ० १.१०)

ऋतमिति सत्यनाम (निघ० २.१०)

ऋतमिति उदकनाम (निघ०१.१२)

ते मनुष्याः कीदृशा भवेयुरित्युपदिश्यते ।

How should those men be is taught in the seventh Mantra.

Manrta—7

त्वे अग्ने सुमतिं भिक्षमाणा दिवि श्रवो दधिरे यज्ञियासः ।
नक्ता च चक्रुरुषसा विरूपे कृष्णं च वर्णमरुणं च सं धुः ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे अग्ने ! ये दिवि त्वे स्थिताः भिक्षमाणाः यज्ञियासः सुमतिं दधिरे श्रवः सन्धुः नक्तोषसा च सह कृष्णम् अरुणं

च वर्णं चात् अन्यान् वर्णान् दधिरे द्विरूपे चक्रुः (ते सुखिनः स्युः) ॥

TRANSLATION

O teacher shining like fire, students desiring good intellect and experts in the performance of Yajnas residing under thy guidance who art full of the light of wisdom, acquire and sustaln knowledge and nourishing good food. With the night and dawn which are respectively of black and red colour, they join other colours and clean to distinguish them. Thus they enjoy happiness.

PURPORT

No one can become a good scholar, without the knowledge of God's creation. As night and day are of opposite nature, so people should distinguish between the similar and opposite attributes.

THE COMMENTATOR'S NOTES

(अग्ने) अध्यापक = Teacher.

(दिवि) प्रकाशस्वरूपे = Full of the light of wisdom or knowledge.

(श्रवः) श्रवणम् अन्नं वा = Hearing of the Shastras or good food.

TRANSLATOR'S NOTES

अग्नि is derived from अगि-गतौ गतेस्त्रयोऽर्थाः ज्ञानं गमनं प्राप्तिश्च श्रव इति अन्न नाम निघ० (२.७) Taking the first meaning, it means a learned person. दिवि is derived from दिवु-क्रीडाविजिगीषा व्यवहारद्युति-स्तुति मोदमदस्वप्नकान्ति गतिवु ।

Here the meaning of द्युति is taken in the sense of the light of wisdom or knowledge. If by अग्ने God is taken, it also may mean that men experts in the performance of the Yajnas or who are respectable, approach God who is Resplendent, soliciting knowledge and good reputation.

श्रवः—श्रुतिजन्यं ज्ञानम् इति श्री कपालिशास्त्रिणः सिद्धांजन भाष्ये । अथैतत सृष्टिकर्तेश्वरः कीदृशोऽस्तीत्युपदिश्यते ।

How is God the Creator of the world is taught in the eight Mantra.

Mantra—8

यान्राये मर्तान्त्सुषूदो अग्ने ते स्याम मघवानो वयं च ।
छायेव विश्वं भुवनं सिसक्ष्यापप्रिवान्रोदसी अन्तरिक्षम् ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे अग्ने (जगदीश्वर) यः त्वं यान् सुसूदः मर्तान् अस्मान् सिसक्षि ते वयं मघवानः स्याम यः भवान् छाया इव विश्वं भुवनं रोदसी अन्तरिक्षं च आपप्रिवान् (व्याप्तवान् अस्ति) (तं सर्वे वयम् उपास्महे) ॥

TRANSLATION

O God ! May we mortals whom Thou hast directed for the acquisition of wealth (spiritual as well as material) be full of such wealth or opulent. Thou pervadest the earth, heaven and firmament and protectest it like a sheltering shade. This whole universe is attached to Thee as Thou art Omnipresent.

PURPORT

Learned persons should themselves be full of the wealth of knowledge and wisdom etc. by the communion with God and industriousness and then should make others possessed of such wealth of knowledge etc.

THE COMMENTATOR'S NOTES

(सिसक्षि) समवैति = Is united with or is attached to.

TRANSLATOR'S NOTES

सुषूदः षूद-प्रेरणे लेट्
सिसक्षि-षच समवाये शचः श्लुः
पुनस्ते कीदृशा भवेयुरित्युपदिश्यते ।

How should they be is taught in the ninth Mantra.

Mantra – 9

अर्वाद्भिरग्ने अर्वतो नृभिर्नृन्वीरैर्वीरान्वनुयामा त्वोताः ।
ईशानासः पितृवित्तस्य रायो वि सूरयः शतहिमा नो अश्युः ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे जगदीश्वर ! त्वोताः वयम् अर्वद्भिः अर्वतः नृभिः नॄन् वीरैः वीरान् वनुयाम । त्वत् कृपया पितृवित्तस्य रायः ईशानासः भवेम सूरयः नः (अस्मान्) शतहिमाः वि अश्युः ॥

TRANSLATION

O God, protected by Thee. may we desire and pray for good horses with our horses, good learned righteous persons with our men, brave heroes with our brave persons. May our sons and other learned persons be inheritors of the wealth got from forefathers and wise teachers, and live for a hundred winters (years).

PURPORT

Men can not obtain knowledge and good articles without conducting themselves in accordance with the attributes, actions and nature of God. Therefore they should behave accordingly with love.

THE COMMENTATOR'S NOTES

(वनुयाम) इच्छेम याचेम = Desire or pray for

(वनु-याचने तना०)

Tr.

पुनस्तत्सहायेन किं प्राप्यत इत्युपदिश्यते ।

What is gained by His (God's) help is taught in the tenth Mantra.

Mantra—10

एता ते अग्न उचथानि वेधो जुष्टानि सन्तु मनसे हृदे च ।
शकेम रायः सुधुरो यमं तेऽधि श्रवो देवभक्तं दधानाः ॥

सन्धिविच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे वेधः अग्ने (जगदीश्वर) ते तव कृपया एता उचथानि अस्माकं मनसे हृदे च जुष्टानि सन्तु ते (तव सम्बन्धेन) यमं देवभक्तं श्रवः दधानाः सुधुरः वयं रायः (धनानि प्राप्तुम्) अधिशकेम ॥

TRANSLATION

O God Giver of knowledge and good intellect : May these Vedic Mantras be dear to our mind and heart being served with love by Thy Grace.

May we be competent to obtain Thy well-supporting wealth being endowed with the knowledge of all sciences which enable us to have self-control and which is served or acquired by all learned persons.

PURPORT

Men should attain all happiness and should make others to do so.

THE COMMENTATOR'S NOTES

(उचथानि) वेदवचनानि = Vedic Mantras.

(जुष्टानि) प्रीतानि सेवितानि = Dear and served.
(जुषी-प्रीति सेवनयोः)

(श्रवः) सर्व विद्याश्रवणम्
= hearing or knowledge of all sciences.

(देवभक्तम्) विद्वद्भिः सेवितम् = Served by learned persons.

Here ends the the commentary on the 73rd hymn and 20th Varga of the Rigveda First Mandala. It is connected with the previous hymn as there is mention of the attributes of God, fire, learned persons and the Sun.

अथैक चतुः सप्ततितमं सूक्तम्

HYMN LXXIV (74)

अस्य नवर्चस्य चतुःसप्ततितमस्य सूक्तस्य राहूगणो गोतम ऋषिः। अग्निर्देवता १, २, ८, ६ निचृद् गायत्री छन्दः। ३, ६ गायत्री। ४, ७ विराड् गायत्री छन्दः। षड्जः स्वरः ॥

Seer-Rahoo. Ganga Gotama, Devata or subject-Agni. Metre-Gayatri in various forms. Tune–Shadja

अथेश्वर गुणा उपदिश्यन्ते।

The attributes of God are taught.

Mantra—1

उपप्रयन्तो अध्वरं मन्त्रं वोचेमाग्नये।
आरे अस्मे च शृण्वते ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे मनुष्याः! यथा उपप्रयन्तः वयम् अस्मे आरे च शृण्वते अग्नये अध्वरं मन्त्रं सततं वोचेम (तथा यूयम् अपि वदत) ॥

TRANSLATION

O men, we chant a loving mantra to our Supreme Leader (God) and utter good words while doing non–violent noble deeds and sacrifices. He listensto our words everywhere, far and near. You should do also like-wise.

PURPORT

Men should enjoy bliss by observing Dharma (righteousness) and by fearing the performance of un–righteous act knowing God to be All-pervading and fully conscious of all their dealings far and near.

THE COMMENTATOR'S NOTE

(अध्वरम्) अहिंसकम् = Non-violent.

(आरे) दूरे आरे इति दूरनाम (निघ० ३. २६)

चात् समीपे =Far and near.

पुनः स कीदृश इत्युपदिश्यते ।

How is He (God) is taught in the 2nd Mantra.

Mantra—2

यः स्नीहितीषु पूर्व्यः संजग्मानासु कृष्टिषु ।

अरक्षद्दाशुषे गयम् ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे मनुष्याः ! यः पूर्व्यः जगदीश्वरः संजग्मानासु कृष्टिसु दाशुषे गयम् अरक्षत् तस्मै अग्नये अध्वरं यथा वयं मन्त्रं वोचेम (तथा यूयम् अपि वदत) ॥

TRANSLATION

O men ! As we chant our non-violent loving Mantra, to God who is the First and the Best, ever to be worshipped, present among the people who go forwardly, harmoniously loving one another, so you should also do. He preserves His wealth for those who give themselves up to Him and are engaged in giving the wealth of knowledge and other virtues.

PURPORT

It is not possible for any soul to have protection and happiness without God. Therefore He should be ever worshipped by all.

THE COMMENTATOR'S NOTES

(कृष्टिषु) मनुष्यादिप्रजासु =Men and other subjects.

कृष्टय इति मनुष्यनाम (निघ० २.१०)

(गयम्) धनम् गयमिति धननाम (निघ० २.१०)

पुनः स कीदृश इत्युपदिश्यते ।

How is He (God) is taught further in the third Mantra.

Mantra—3

उत ब्रुवन्तु जन्तव उदग्निर्वृत्रहाजनि । धनञ्जयो रणेरणे ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

यः रणे रणे धनंजयः वृत्रहा इव दाशुषे गयम् उदजनि उत अपि यं विद्वांसः उपदिशन्ति तं जन्तवः अन्योन्यम् उपब्रुवन्तु ॥

TRANSLATION

Let us speak about God with one another who is the Dispeller of all darkness of ignorance (as the sun is of the clouds). He provides wealth to the giver of knowledge and other virtues. It is He who causes victory to His noble devotees in every fight (internal as well as external).

PURPORT

O men, you should ever serve or adore God by taking shelter in whom enemies are conquered, victory is gained and prosperity of the State is acquired.

THE COMMENTATOR'S NOTES

(जन्तवः) जीवाः = Souls

(अग्निः) विजयप्रदो भगवान्

= God who is the Giver of victory.

(वृत्रहा) मेघहन्ता सूर्यः इव अविद्यान्धकारनाशकः

= The Dispeller of the darkness of ignorance like the Sun of the clouds.

TRANSLATOR'S NOTES

जन्तव इति मनुष्यनाम (निघ० २.३)

पाप्मा वै वृत्रः (शतपथ ११ १.५.७)

पुनः सः (अग्निः) कीदृश इत्युपदिश्यते

How is Agni is taught further in the 4th Mantra.

Mantra—4

यस्य॑ दू॒तो अस‍ि॒ क्षये॒ वेषि॑ ह॒व्यानि॑ वी॒तये॑ ।

द॒स्मत्कृ॑णो॒ष्य॑ध्व॒रम् ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे विद्वन् ! यस्य वीतये अग्निः इव दूतः असि क्षये हव्यानि वेषि दस्मत् अध्वरं च कृणोषि (तं सर्वे सत्कुर्वन्तु) ॥

TRANSLATION

O learned person ! Let all persons honour a man for whose knowledge you are destroyer of all miseries like fire, whom you provide with all good articles necessary in his house and whose non-violent sacrifice which is multiplier of wisdom and knowledge you make destroyer of all sufferings.

PURPORT

The man never suffers who makes a teacher and a preacher, his instructors like the Omniscient God.

THE COMMENTATOR'S NOTES

(दूतः) दुःखोपनाशकः = Destroyer of miseries.

(हव्यानि) होतुमर्हाणि उत्तमगुणकर्मयुक्तानि द्रव्याणि।
= Good and useful acceptable articles.

(दस्मत्) दुःखोपक्षेतारम् अत्र बाहुलकादौणादिको मदिक् प्रत्ययः।
= Destroyer of sufferings.

TRANSLATOR'S NOTES

दु - उपतापे हु - दानादनयोः आदानेच दसु - उपक्षये।

पुनः स कीदृश इत्युपदिश्यते।

Mantra—5

तमित्सुहव्यमङ्गिरः सुदेवं सहसो यहो।
जना आहुः सुबर्हिषम् ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे अंगिरः सहसो यहो (विद्वन्) यं त्वाम् अग्निम् इव

सुदेवं सुबर्हिषं जनाः आहुः (तम् इत् वयं सेवेमहि) ॥

TRANSLATION

O dear like life, son of a noble mighty person, let us serve you who are shining like fire and whom men call full of divine attributes and liberal donor, endowed with good knowledge and full of most acceptable virtues.

PURPORT

Men should acquire scientific knowledge from a well-known person among the learned, should learn its application and teach it to others.

THE COMMENTATOR'S NOTES

(अंगिरः) अंगानां रसरूपः

= Dear like the Prana which is the essence of all organs.

(सहसः यहो) प्रशस्तबलयुक्तस्य पुत्र

= The son of a noble mighty person.

(सुबर्हिषम्) शोभनानि बर्हींषि-विज्ञानानि यस्य तम्

= Endowed with good knowledge.

TRANSLATOR'S NOTES

प्राणो वा अंगिरा: (शतपथे ६१२२८ ॥ ६.५.२.३,४)
सह: इति बलनाम (निघ० २.९) यहुः इति अपत्यनाम (निघ० २.२)

बर्हिः इति पदनाम (निघ०५.२) पद-गतौ अत्र गते स्त्रिष्वर्थेषु ज्ञानार्थग्रहणम्

पुनः स कीदृश इत्युपदिश्यते ।

How is Agni is taught further in the sixth Mantra.

Mantra—6

आ च वहासि ताँ इह देवा उप प्रशस्यते ।

हव्या सुश्चन्द्र वीतये ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे सुश्चन्द्र आप्तविद्वन् ! त्वम् इह प्रशस्तये वीतये च यान् हव्या देवान् उप आवहासि (सर्वतः प्राप्नुयाः) (ताम् वयं प्राप्नुयाम) ।।

TRANSLATION

O absolutely truthful learned person, thou who art giver of good delight and gold as thou approachest in this world acceptable enlightened men or divine virtues for glorification and the attainment of all Joy, so we also do.

PURPORT

So long as men do not exert themselves for the communion with and knowledge of God, an absolutely truthful person and fire etc. they can not acquire knowledge.

THE COMMENTATOR'S NOTES

(देवान्) विदुषः दिव्यगुणान् वा

= Enlightened persons or divine virtues.

(सुश्चन्द्र) शोभनं चन्द्रम् आह्लादनं हिरण्यं वा यस्मात् तत् सम्बुद्धौ चन्द्रमिति हिरण्यनाम (निघ० १.२) ह्रस्वाच्चन्द्रोत्तरपदे मन्त्रे (अष्टा० ६. १. १५१) इति सुडागमः ।।

(वीतये) सर्वसुखव्याप्तये ।

= For the attainment of all joy.

TRANSLATOR'S NOTES

विद्वांसो हि देवाः (अत० ३. ७. ३. १०)

चदि-आह्लादे वी-गतिव्याप्तिप्रजनकान्त्यसनखादनेषु

पुनः स कीदृश इत्युपदिश्यते ।

How is Agni is taught further in the seventh Mantra.

Mantra—7

न योरुपब्दिरश्व्यः शृण्वे रथस्य कच्चन ।

यदग्ने यासि दूत्यम् ।।

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे अग्ने ! यथा उपब्दिः अश्वः त्वं यत् यस्य योः रथस्य मध्ये स्थितः सन् दूत्यं यासि तस्य समीपे अन्यान् शब्दान् अहं कच्चन न शृण्वे (तथा अहं यामि त्वम् अपि मा शृणु) ॥

TRANSLATION

O learned person shining on account of thy knowledge like fire, when thou actest like a messenger, maker of good or effective sound like a swift horse, when standing near the band of the moving vehicles like the aeroplanes etc. I cannot hear any other sound. I also go near such vehicles and have the same experience.

PURPORT

Men can not hear other sounds near the fire used in various machines manufactured with the technical science and moving them.

THE COMMENTATOR'S NOTES

(अग्ने) अग्निवद् विद्यया प्रकाशमान

= Shining like the fire with knowledge.

(उपब्दिः) महाशब्दकर्ता । उपब्दिरिति वाङ्नाम (निघ० १.११)

= Maker of great good and effective sound.

पुनः स कीदृश इत्युपदिश्यते ।

How is Agni is taught further in the eighth mantra.

Mantra—8

त्वोतो वाज्यह्रयोऽभि पूर्वस्मादपरः ।

प्रदाश्वां अग्ने अस्थात् ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे अग्ने यथा अह्रयः अपरः त्वा ऊतः वाजी दाश्वान् वा पूर्वस्मात् अभि सम्प्रयुक्तः सन् (प्रतिष्ठते) प्रस्थितो

भवति (तथा अन्ये पदार्थाः सन्ति इति विजानीहि) ॥

TRANSLATION

(1) O learned person ! A men of charitable disposition protected by thee thought formerly inferior, becomes mighty going rapidly to his destination without hesitation and is honoured everywhere.

(2) An artist aided by an expert learned scientist manufactures good quick-moving machines.

PURPORT

Men should know that without the machines manufactured with the aid of technology, none can move vehicles where fire is used.

THE COMMENTATOR'S NOTE

(दाश्वान्) दाता (दाशृ-दाने दाश्वान् साह्वान् इति क्वसु प्रत्ययान्तो निपातितः ॥ Donor.

(१) अह्रयः ये सद्यः अन्हुवन्ति व्याप्नुवन्ति यानानि मार्गास्ते ।

How is Agni is taught further in the ninth Mantra.

Mantra—9

उत द्युमत्सुवीर्यं बृहदग्ने विवाससि ।
देवेभ्यो देव दाशुषे ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे देव अग्ने (विद्वन्) यथा त्वं दाशुषे उत देवेभ्यः द्युमत् बृहत् सु वीर्यं विवाससि (तथा तं वयं सदा सेवेमहि)॥

TRANSLATION

O learned person, thou who art like electricity, fire etc. endowed with divine virtues, actions and temperament, as thou art desirous of bestowing upon the liberal master of the

works and other educated persons brilliant great strength or vigour, so we always serve thee.

PURPORT

Learned persons and their attendants should take great beneficial acts from the masters of works.

This hymn is connected with the previous hymn as it deals with God, learned persons, electricity and fire.

Here ends the commentary on the seventy-fourth hymn and 22nd Varga of the first Mandala of the Rigveda.

अथ पञ्चसप्ततितमं सूक्तम्
HYMN LXXV (75)

अस्य सूक्तस्य राहूगणो गोतम ऋषिः । अग्निर्देवता । १ गायत्री छन्दः । २, ४, ५ निचृद् गायत्री । ३ विराड् गायत्री छन्दः ।

Seer-Rahoo Gana-Gotama Devata or subject-Agni, Metre-Gayatri in various forms. Tune-Shadja.

Mantra—1

जुषस्व सप्रथस्तमं वचो देवप्सरस्तमम् ।
हव्या जुह्वान आसनि ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे विद्वन् ! आसनि हव्या जुह्वानः त्वं (यो विदुषां व्य हारः तं सप्रथस्तमं देवप्सरस्तमं वचः च जुषस्व ॥

TRANSLATION

O learned person, take eatable good articles of diet in thy mouth, the liberal conduct of enlightened persons and the speech which is acceptable to them.

PURPORT

Those persons enjoy the happiness of body and soul who are regular and restrained in their diet and who observe Brahmacharya (continence, purity and self-control).

THE COMMENTATOR'S NOTES

(सप्रथस्तमम्) अतिशयेन विस्तारयुक्तं व्यवहारम् ।

= Liberal conduct free from narrowness.

(देवप्सरस्तमम्) देवैर्विद्वद्भिरतिशयेन ग्राह्यम् ।

= Most acceptable to enlightened persons.

पुनस्तं प्रत्यन्ये किं वदेयुरित्याह ।

What should others speak to him (a learned leader) is taught in the second mantra.

Mantra—2

अथा ते अङ्गिरस्तमाग्ने वेधस्तम प्रियम् ।

वोचेम ब्रह्म सानसि ॥

सन्धिच्छेदसहितोऽन्वय: (ऋषिकृत:)

हे अंगिरस्तम वेधस्तम अग्ने (विद्वन्) यथा वयं वेदान् अधीत्य अथ ते (तुभ्यं) सानसि प्रियं ब्रह्म वोचेम (तथा एव त्वं विधेहि) ॥

TRANSLATION

O most learned active and wise leader ! best among the knowers of all sciences, as we teach you the eternal gratifying Vedas (four in number) after studying them thoroughly, you should also do like wise.

PURPORT

None can attain knowledge about God, electricity and other subjects without being taught by a good teacher, therefore all men should hear and teach about them.

THE COMMENTATOR'S NOTES

(अंगिरस्तम) अंगति गच्छति जानाति सोऽतिशयितस्तत् सम्बुद्धौ ।

= The most learned, active and wise.

(वेधस्तम) अतिशयेन सर्वविद्याधर ।

= The best among the knowers of all sciences.

(सानसि) सनातनम् = Eternal.

TRANSLATOR'S NOTES

वेधा इति मेधाविनाम (निघ० ३.१५).

Hence it has been translated as most wise, besides the best among the knowers of all sciences.

वि - धा - धारण पोषणयो:

विधात्रो वेध च (उपा० ४.२२५)

Prof. Wilson has translated वेधस्तम as most wise following Sayanacharya who has interpreted it rightly as वेधा इति मेधाविनाम अतिशयेन मेधाविन् ।

Griffith has also translated it as 'O wisest' and yet they think quite erroneously that this epithet is applicable to the material fire, which is absurd. Rishi Dayananda was therefore right in taking the word Agni used here, not for material fire but for a learned leader.

अग-गतौऽगतेस्त्रयोऽर्थाः ज्ञानं गमनं प्राप्तिश्च अग्नि: कस्मात् अग्रणीर्भवति (निरुक्ते)

It is wrong on the part of most of the Western translators like Wilson, Griffith and others to take अंगिरा: as the name of a particular Rishi forgetting the principles of the Vedic terminology. Sayanacharya has himself interpreted the word derivatively as अतिशयेन अंगनादि गुण युक्त though he has also committed the mistake of taking it as alternative as यद् वा अंगिरसां वरिष्ठ: which is opposed to the principle of Vedic terminology explained by him in his introduction to the commentary of the Rigveda. The word अंगिरा is derived from अगि-गतौ which means ज्ञान गमन प्राप्ति therefore taking the first meaning of ज्ञान or knowledge it means most learned as interpreted by Rishi Dayananda Sarasvati. In the Vedic Lexicon-Nighantu 5-5 it is stated अंगिरस इति पदनाम (निघ० ५.५) so it अंगिरस्तम certainly means the most learned person. It is absurd to use superlative degree with a proper noun.

पुन: स कीदृश इत्युपदिश्यते ।

How is Agni, is taught in the third Mantra.

Mantra—3

कस्ते जामिर्जनानामग्ने को दाश्वध्वरः ।
को ह कस्मिन्नसि श्रितः ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे अग्ने (विद्वन्) जनानां मध्ये ते (तव) कः ह जामिः अस्ति कः दाश्वध्वरः कः कस्मिन श्रितः असि इत्यस्य सर्वस्य वद उत्तरम् ।

TRANSLATION

O knower of all Vidyas (sciences) who among men knows you well ? who is the liberal performer of non-violent sacrifices ? who are you and dependent on whom ? Give answer to these questions.

PURPORT

It is rare among men to find who know well and teach about God and fire etc., because they (God and fire) are endowed with wonderful attributes.

THE COMMENTATOR'S NOTES

(जामिः) ज्ञाता अत्र माधातोर्बाहुलकादौणादिको मि-प्रत्ययो जादेशश्च ।
= Knower.

(अग्ने) सकलविद्यावित् = Knower of all sciences.

TRANSLATOR'S NOTES

It is clear from Rishi Dayananda's Bhavartha or purport that he takes from the word Agni used here not only a learned person or fire but also God. In that case, the meaning will be Who O Omniscient God is Thy perfect knower ? Who is it that can perform non-violent sacrifices in altogether perfect manner ? Who art Thou should be known by us. On whom art Thou dependent ? On none.

The answer to the questions is to be found in the next mantra.

Mantra—4

त्वं जामिर्जनानामग्ने मित्रो असि प्रियः ।

सखा सखिभ्य ईड्यः ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे अग्ने (विद्वन्) यतः त्वं जनानां जामिः मित्रः प्रियः ईड्यः सन् सखिभ्यः सखा असि (तस्मात् सर्वैः सत्कर्तव्यः असि) ॥

TRANSLATION

O learned person ! as you are giver of peace to all men like water, their friend giver of happiness to your friends and praise-worthy, therefore we honour you.

PURPORT

Why should not men serve a person who being friendly to all, gives knowledge and other good virtues and happiness ?

THE COMMENTATOR'S NOTES

(जामिः) उदकमिव शान्तिप्रदः जामिरित्युदकनाम (निघ० १.१२)

= Giver of peace like water.

TRANSLATOR'S NOTES

Besides the above meaning taking Agni for a highly learned person, there is the spiritual meaning of the Mantra relating to God as the following metrical translation shows :

Thou art our Kith and Kin.
Thou art our Dearest Friend.
Thou art Our Friend Worthy of praise.
Do us Lord always raise.

पुनः स कीदृश इत्युपदिश्यते ।

How is Agni is taught further in the fifth Mantra.

Mantra 5

यजा नो मित्रावरुणा यजा देवाँ ऋतं बृहत् ।
अग्ने यक्षि स्वं दमम् ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे अग्ने यतः त्वम् स्वं दमं यक्षि तस्मात् नः मित्रा-

वरुणा यज बृहत् ऋतं देवान् च यज ॥

TRANSLATION

O learned person ! as you abide peacefully in your house, having self control, please unite us with strengthening Prana and Udana (vital breaths), Unite us with divine enjoyments and with true knowledge endowed with great wisdom and other virtues.

PURPORT

As God is Doer of good to all, just and liberal Donor, learned persons should also imitate Him.

THE COMMENTATOR'S NOTES

(मित्रावरुणा) बलपराक्रमकारकौ प्राणोदानौ ।।

= Prana and Udana which produce strength.

(ऋतम्) सत्यं विज्ञानम् = True knowledge.

TRANSLATOR'S NOTES

प्राणोदानौ मित्रावरुणौ (शतपथे ३.२.२.१३)

ऋतमितिसत्यनाम (निघ० ३.१०)

Those persons of the Judicial aud Military department, who behave with men in proper manner should be appointed for such purposes and all works should be accomplished.

THE COMMENTATOR'S NOTES

(यदुषु) प्रयत्नकारिषु मनुष्येषु
= Among industrious persons.

(तुर्वशेषु) तूर्वन्तीतितुरवस्तेषां वशा:-वशंकर्तारो मनुष्या-स्तेषु = Among the controllers of the violent.
तुर्वी-हिंसायाम् द्रुह्यु षु) द्रोहकारिषु
= Among the malevolent or tyrannical.

(पूरुषु) परिपूर्णसद्गुणविद्याकर्मसु मनुष्येषु
= Among men full of noble virtues, wisdom and good actions.

TRANSLATOR'S NOTES

It is gratifying to note that even Sayanacharya takes these words like Yadu यदु तुर्वश, अनु, पुरु not as proper nouns but as derivatives denoting certain attributes. For instance he explains यदुषु as नियतेषु परेषामहिंसकेषुमनुष्येषु तुर्व-शेषु-हिंसकेषु मनुष्येषु । अनुषु प्राणत्सु, सबलैः प्राणैर्युक्तेषु ज्ञानिष्वनुष्ठातृमनुष्येषु पूरुषु-कामैः पूरयितव्येषु अन्येषु स्तोतृ-जनेषु । यदवः यमउपरमे नियमयन्त इन्द्रियाण्येभिरिति यदवः तुर्वी हिंसार्थः ।

पुनस्तौ कीदृशावित्युपदिश्यते ।

How are these (Indra and Agni) is taught further in the ninth Mantra.

Mantra—9

यदिन्द्राग्नी अवमस्यां पृथिव्यां मध्यमस्यां परमस्यामुत स्थः ।
अतः परि वृषणावा हि यातमथा सोमस्य पिबतं सुतस्य ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

(१) हे इन्द्राग्नी यद् युवाम् अवमस्यां मध्यमस्याम् उत अपि परमस्याम् पृथिव्यां (स्वराज्यभूमौ) अधिकृतौ स्थः (तौ सर्वदा सर्वैः रक्षणीये स्तः)। अतः अत्र परिवृषणौ भूत्वा आयातं हि खलु अत्र तत्रस्थं सुतस्य सोमस्य रसं पिबतम् इत्येकः ॥

(२) यत् (यौ) इमौ इन्द्राग्नी अवमस्याम् मध्यमस्यां उत (अपि) परमस्यां पृथिव्यांस्थः अतः अत्र परिवृषणौ-भूत्वा आयातम् आगच्छतं हि खलु अथ यौ सुतस्य सोमस्य रसं पिबतं (पिबतः) तौ कार्यसिद्धये प्रयुज्य मनुष्यैः महालाभः सम्पादनीयः ॥

TRANSLATION

O Indra and Agni (Chief Judicial Officer and Chief Commander of the Army.)

You who have sway over the best, middle and low kind of the land, should be always protected and guarded by all men. Being showerers of happiness, come hither from wherever you may be and drink of the effused juice of the various articles in the world.

PURPORT

(1) The State may be divided into three categories on account of the best, the middle and mean attributes and habits of its inhabitants Persons of the same nature, habits and temparament should be established in the above regions and

should enjoy bliss by having a vast and good Government.

(2) All men should know the atrributes of the air and electricity which reside in all worlds. They should be utilised properly, in order to destroy the misery of poverty etc. having the accomplishment of various works.

THE COMMENTATOR'S NOTES

(इन्द्राग्नी) न्यायसेनाध्यक्षौ वायुविद्युतौ वा

= The heads of the judicial department and Army or air and electricity.

The same subject is continued

Mantra—10

यदिन्द्राग्नी परस्यां पृथिव्यां मध्यमस्यामवमस्यामुत स्थः ।
अतः परि वृषणावा हि यातमथा सोमस्य पिबतं सुतस्य ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)
(पूर्ववत् अर्थोऽपि पूर्ववत्)

Translation as given above with this difference that here by परमस्याम्, मध्यमस्याम् and अवमस्याम् पृथिव्यां may be taken the upper, the middle and the lower regions of the earth.

PURPORT

Indra and Agni are of two kinds. Those who are of good virtues, actions and temperament nnd residing in pure and clean places are called उत्तम or the best. Those who are of impure attributes, actions and temperaments and residing in impure or un-clean places are called अवर or low. Air and electricity go from below to up-wards and from above to below. The word परम and अवम used in the Mantras denote this.

Where are material Indra and Agni is further taught in the 11th Mantra

Mantra—11

यदिन्द्राग्नी दिवि ष्ठो यत्पृथिव्यां यत्पर्वतेष्वोषधीष्वप्सु ।
अतः परि वृषणावा हि यातमथा सोमस्य पिबतं सुतस्य ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

यत् इन्द्राग्नी दिवि यत् पृथिव्यां यत् पर्वतेषु अप्सु ओषधीषु स्थः (वर्तेते) अतः परिवृषणौ तौ हि आयातम् (आगच्छतः) अथ सुतस्य सोमस्य रसं पिबतम् ।

TRANSLATION

Indra and Agni (air and electricity) that are in heavan or solar world or upon earth, in the mountains, in the herbs or in the waters, being showerers of happiness, come here and drink of the effused juice of the various articles of the world.

PURPORT

Dhananjaya air and air in the causal form are present ia all things of the world. When properly known and used methodically they accomplish various works.

पुनस्तौ कीदृशावित्युपदिश्यते ।

How are they is taught further in the 12th Mantra.

Mantra—12

यदिन्द्राग्नी उदिता सूर्यस्य मध्ये दिवः स्वधया मादयेथे ।
अतः परि वृषणावा हि यातमथा सोमस्य पिबतं सुतस्य ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

यत् (यौ) इन्द्राग्नी उदिता सूर्यस्य दिवः मध्ये स्वधया सर्वान् मादयेथे (हर्षयतः) अतः वृषणौ परि

आयातम् (परित: बाह्याभ्यन्तरत:) आगच्छत: हि खलु अथ सुतस्य सोमस्य रसं पिबतम् (पिबत) ।

TRANSLATION

Indra and Agni (air and electricity) gladden all along with water or corn on the rising of the sun and In the midst of the sky. The rest as before.

PURPORT

Without air and electricity, no world or its creatures can live and get preservation, therefore these two are prominent in sustaining the world. How are Indra and Agni (wealthy treasurer and commander-in-chief of the Army) is taught further in the thirteenth Mantra.

Mantra—13

एवेन्द्राग्नी पपिवांसा सुतस्य विश्वास्मभ्यं सं जयतं धनानि ।
तन्नो मित्रो वरुणो मामहतामदितिः सिन्धुः पृथिवी उत द्यौः ॥

सन्धिच्छेदसहितोऽन्वय: (ऋषिकृत:)

मित्र: वरुण: अदिति: सिन्धु: पृथिवी उत द्यौ: यानि न: (अस्मभ्यम्) मामहन्ताम् तत् (तानि एव विश्वा धनानि सुतस्य (निष्पन्नस्य) रसं पपिवांसा इन्द्राग्नी संजयतम् (सम्यक्साधयत:) ॥

TRANSLATION

May friends, noble persons, earth, firmament, river and ocean, light of the sun etc. help us in advancement, so that we may become respectable everywhere. May they enable Indra (wealthy treasurer) and (Agni) a commander of the Army who is well-versed in Military Science to conquer all kind of wealth, drinking of the juice of various nourising objects of the world. They accomplish various works well when used Methodically.

THE COMMENTATOR'S NOTES

(इन्द्राग्नी) परमधनाढ्यः शुद्धविद्याप्रवीणश्च ।

= Very wealthy treasurer of the State and expert in Military Science.

PURPORT

Without the learned, mighty and righteous treasuser and commander of the Army, it is not possible to aurgment the knowledge and other kinds of wealth of good and industrious persons. As friends give happiness to their friends, in the same manner, treasurer and commanders of the Army etc give happiness to all men of the public. Therefore, they should be always gaurded well.

This hymn is connected with the previous hymn, as there is mention of the attributes of the air, electricity etc. in this, as in the previous one.

Here ends the commentary on the 108th Hymn and the 27th Varga of the first Mandala of the Rig Veda.

अथ नवोत्तरशततमं सूक्तम्

HYMN - CVIX (109)

अस्य नवोत्तरशततमस्य सूक्तस्यांगिरसः कुत्स ऋषिः । इन्द्राग्नी देवते । १, ३, ४, ६, ८ निचृत् त्रिष्टुप् छन्दः । २,५ त्रिष्टुप् । ७ विराट् त्रिष्टुप् छन्दः । धैवतः स्वरः ।

Seer of the hymn – Angirasa Kutsa. Devata or subject– Indra and Agni. Metres – Trishtup in various forms. Tune – Dhaivata.

पुनस्तौ विद्युत्प्रसिद्धाग्नी कीदृशावित्युपदिश्यते ।

How are electricity and fire is taught in the first Mantra.

Mantra—1

वि ह्यख्यं मनसा वस्य इच्छन्निन्द्राग्नी ज्ञास उत वा सजातान् ।
नान्या युवत्प्रमतिरस्ति मह्यं स वां धियं वाजयन्तीमतक्षम् ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

यथा इन्द्राग्नी इच्छन् वस्यः अहं ज्ञासः सजातान् उत वा मनसा ज्ञातुम् इच्छन् युवत् अहम् एतानि हि खलु व्यख्यं तथा यूयम् अपि विख्यात । या मम प्रमतिः अस्ति सा युष्मभ्यम् अपि अस्तु, न अन्या यथा अहम् वाम् (अध्यापकाध्येतृभ्याम्) वाजयन्तीं धियम् अतक्षम् तथा सः अध्यापकः अध्येता च एतां मह्यं तक्षतु ।

TRANSLATION

As desirous of wealth, I who try to be the best among the Vasu Brahmacharis (observing Brahmacharya upto the age of atleast 24 years) accept with knowledge Indra and Agni (electricity and fire) and instruct about them to the learned and the students born together, of equal age, you should also do likewise. The clear understanding or sharp

intellect that I possess by God's grace, may be possessed by all and none different from it. As I give this good intellect to you O teachers and the taught which enables you to acquire good knowledge, so you should also give to me. So mutually we may help one another.

PURPORT

It is the duty of men to teach with admirable love and exertion good sciences and create pure intellect and thus to accomplish all acts that lead to worldly prosperity and emancipation.

THE COMMENTATOR'S NOTES

(इन्द्राग्नी) विद्युद्भौतिकौ अग्नी=Electricity and fire.

(वाजयन्तीम्) सकलानां विद्यानां विज्ञापिकाम्

= Teaching all sciences.

TRANSLATOR'S NOTES

वज-गतौ गतेस्त्रयोऽर्थाः—ज्ञानं गमनं प्राप्तिश्च णिच्

अत्र ज्ञानार्थग्रहणम् ।

पुनस्तौ कीदृशावित्युपदिश्यते ।

How are they (Indra and Agni) is taught further in the second Mantra.

Mantra—2

अश्र॑वं॒ हि भू॑रि॒दाव॑त्तरा वां॒ विजा॑मातुरु॒त वा॑ घा स्या॒लात् ।

अथा॒ सोम॑स्य॒ प्रय॑ती यु॒वभ्या॒मिन्द्रा॑ग्नी॒ स्तोमं॑ जनयामि॒ नव्य॑म् ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

यौ वाम् (एतौ) भूरिदावत्तरा इन्द्राग्नी वर्तेते यौ विजामातुः स्यालात् उत (अपिवा) घ अन्येभ्यः च एव धनानि दापयतः इति अहम् अश्रवम् अथ हि युवभ्याम् एताभ्याम् सोमस्य प्रयती (ऐश्वर्यप्रदानाय) नव्यं स्तोमम् अहं जनयामि ।

TRANSLATION

O Indra and Agni (Electricity and fire or father and Acharya) I have heard that you are more munificent givers than an un-worthy son-in-law or the brother of the bride. Therefore for giving wealth (spiritual and material) I reveal your admirable attributes.

PURPORT

All men should accomplish various works by knowing the attributes of electricity and other objects and by using them scientifically for constructing useful machines. Having done this, they should achieve and accomplish Dharma (righteousness), Artha (wealth) Karma (fulfilment of noble desires) and Moksha (Emancipation).

THE COMMENTATOR'S NOTES

(सोमस्य) ऐश्वर्यप्रापकस्य व्यवहारस्य

=Of a dealing leading to prosperity षू-प्रसवैश्वर्ययोः ।

(स्तोमम्) गुणप्रकाशम्

=Manifesting or expressing the attributes.

पुनरेताभ्यां किं न कर्त्तव्यमित्युपदिश्यते ।

What should not be done with them (Indra and Agni) is taught further in the third Mantra.

Mantra—3

मा च्छेद्म रश्मीँरिति नाधमानाःपितॄणां शक्तीरनुयच्छमानाः ।
इन्द्राग्निभ्यां कं वृषणो मदन्ति ता ह्यद्री धिषणाया उपस्थे ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

यथा वृषणः यौ अद्री वर्त्तेते ता सम्यग् विज्ञाय एताभ्याम् इन्द्राग्निभ्यां धिषणायाः उपस्थे कं प्राप्य मदन्ति तथा पितॄणां रश्मीन नाधमानाः शक्तीः अनुयच्छमानाः वयं मदेमहि इति विज्ञाय एतदादिविद्यानां मलं मा छेद्म ।

TRANSLATION

As mighty persons enjoy happiness by knowing well electricity and fire which are indestructible in their causal form and utilise them in all dealings of intellect, in the same manner, let us also enjoy happiness following the knowledge, wisdom and splendour of the experienced father by approching learned persons or acting according to different seasons in order to keep health. Let us never cut off the root of these sciences.

PURPORT

Those persons who are desirous of gaining prosperity, should never give up the service and association of learned persons. They should not also go against the knowledge and proper conduct according to different seasons like the spring and summer etc. They should laboriously develop their knowledge and intellect and thus accomplish all their works well.

THE COMMENTATOR'S NOTES

(रश्मीन्) विद्याविज्ञानतेजांसि
Wisdom, Scientific and other knowledge and splendour.

(पितॄणाम्) पालकानां विज्ञानवतां विदुषां रक्षानुयुक्तानाम् ऋतूनां वा
=Of learned experienced guardians of seasons.

(धिषणायाः) प्रज्ञायाः = Of the intellect.

TRANSLATOR'S NOTES

The word पितर: (Pitarah) is derlved from पा-रक्षणे hence the interpretation of पितॄणाम् as पालकानां विदुषाम् ।

षड्वा ऋतवः पितरः ।। (शतपथ ६. ४. ३. ८)

ऋतवो वै पितरः ।। (शतपथ २. ६. १. ३२)

ऋतवः पितरः (कौषीतकी ब्राह्मणे ५. ७ गोपथ उ० १. २४) ।

Rishi Dayananda Sarasvati's interpretation of पितॄणाम् as रक्षायुक्तानाम् ऋतूनां वा is based upon the above authority of the Brahmans. The word धिषणा is used for धी and प्रज्ञा (Intellect) even in classical Sanskrit as stated in मेदिनी कोष धिषणा धियि योषिति (मेदिनी कोषे ५c) and बुद्धिर्मनीषाधिषणा धीः प्रज्ञा शेमुषी मतिः ॥ (अमर कोष० १. २७८) । (नाधमानाः) ऐश्वर्याप्तिमिच्छुकाः Desiring wealth or prosperity. नाधृयाञ्चोपतापैश्वर्याशीःषु अत्र प्रथमार्थ ग्रहणम् ॥ Sayanacharya interprets the Mantra only for begetting children which is not correct.

पुनस्तौ कीदृशावित्युपदिश्यते ।

How are Indra and Agni is taught further in the fourth Mantra.

Mantra—4

युवाभ्यां देवी धिषणा मदायेन्द्राग्नी सोममुशती सुनोति ।
तावश्विना भद्रहस्ता सुपाणी आ धावतं मधुना पृङ्क्तमप्सु ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

या सोमम् उशती देवी धिषणा मदाय युवाभ्यां (कार्याणि) सुनोति तया यौ इन्द्राग्नी अप्सु मधुना पृक्तं भद्रहस्ता सुपाणी अश्विना स्तः तौ इन्द्राग्नी (यानेषु संप्रयुक्तौ सन्तौ) आधावतम् (समन्तात् यानानि धावयतम्) ।

TRANSLATION

The intellect bright or shining with divine education and Shastric Knowledge, desiring prosperity accomplishes for delight many works with the help of Indra and Agni (elecricity and fire). Those two which are pervasive of auspicious attributes like hands of noble dealings when mixed with water and used methodically in various vehicles, enable them to run swiftly.

PURPORT

Men can not take benefits out of electricity and other objects unless they receive good education. good knowledge of various arts and industries with their intellects. Therefore they must accomplish this with labour.

THE COMMONTATOR'S NOTES

(देवी) दिव्यशिक्षाशास्त्रविद्याभिर्दीप्यमाना
=Shining with divine education and Shastrie Knowledge.

(अश्विना) व्याप्तिशीलौ अशूङ्-व्याप्तौ

(सुपाणी) शोभनाः पाणयो व्यवहारा ययोस्तौ ।

(पण-व्यवहारे) स्तुतौ च धातुपाठे ।

पुनस्तौ कीदृशावित्युपदिश्यते ।

How are they (Indra and Agni) is taught further in the fifth Mantra.

Mantra—5

युवामिन्द्राग्नी वसुनो विभागे तवस्तमा शुश्रुव वृत्रहत्ये ।
तावासद्या बर्हिषि यज्ञे अस्मिन्प्र चर्षणी मादयेथां सुतस्य ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

अहं वसुनः विभागे वृत्रहत्ये वा युवाम् इन्द्राग्नी तवस्तमा स्तः इति शुश्रुव (शृणोमि) । अतः तौ प्रचर्षणी अस्मिन् वर्हिषि यज्ञे सुतस्य (निष्पादितं यानम्) आसद्य मादयेथाम् ।

TRANSLATION

I have heard that at the division or distribution of wealth and in the destruction of enemeis, these two (Indra and Agni or electricity and fire) are most vigorous and givers of strength, May they which are bringer of happiness, make

us delighted in developing this Yajna (unified technical dealing) having prepared a car in the form of an aircraft.

PURPORT

Why should not men use methodically and scientifically electricity and fire by the aid of which they earn and distribute wealth among the needly and are able to rule over a vast and good Government having got victory over their enemies ?

THE COMMENTATOR'S NOTES

(तवस्तमा) अतिशयेन बलयुक्तौ बलप्रदौ वा

=Vigorous and givers of strength.

(बर्हिषि) उपवर्धयितव्ये = To be developed.

(यज्ञे) संगमनीये शिल्पव्यवहारे

=In the technical dealing that is to be unified.

तव इति बलनाम (निघ० २. ६)

The word बर्हिः is derived from बृह-बृद्धौ hence the interpretation of बर्हिषि as उपवर्धयितव्ये. The word Yajna is derived from यज-देव-पूजा संगतिकरणदानेषु. Here Rishi Dayananda Sarasvati has taken it in the sense of संगतिकरण or unification, particularly शिल्पयज्ञ.

अथ वायुविद्युतौ कीदृशावित्युपदिश्यते

How are air and elctricity is taught in the sixth mantra.

Mantra—6

प्र चर्षणिभ्यः पृतनाहवेषु प्र पृथिव्या रिरिचाथे दिवश्च ।
प्र सिन्धुभ्यः प्र गिरिभ्यो महित्वा प्रेन्द्राग्नी विश्वा भुवनात्यन्या ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

इन्द्राग्नी अन्या विश्वा भुवना (अन्यान् सर्वान् लोकान्) महित्वा पृतनाहवेषु चर्षणिभ्यः प्र पृथिव्याः प्र सिन्धुभ्यः

प्र गिरिभ्यः प्रदिवः च प्र अतिरिचाथे (प्रातिरिक्तौ भवतः) ॥

TRANSLATION

At the time of battle, Indra and Agni (air and electricity) surpass all men (in magnitude) are vaster than the earth, than the sky, than the rivers and than the mountains. They exceed all worlds and all existent things.

PURPORT

There cannot be a greater world than the air and electricity, for, they pervade all worlds.

THE COMMENTATOR'S NOTES

(पृतनाहवेषु) सेनाभिः प्रवृत्तेषु युद्धेषु
(इन्द्राग्नी) वायुविद्युतौ = Air and electricity.
पृतना इति संग्राम नाम (निघ० २.१७) Tr.

अथाध्यापकाध्येतारौ कीदृशावित्युपदिश्यते

How are teachers and the taught is instructed in the seventh Mantra.

Mantra—7

आ भरतं शिक्षतं वज्रबाहू अस्माँ इन्द्राग्नी अवतं शचीभिः ।
इमे नु ते रश्मयः सूर्यस्य येभिः सपित्वं पितरो न आसन् ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे वज्रबाहू ! इन्द्राग्नी युवां ये इमे सूर्यस्य रश्मयः सन्ति ते रक्षणादिकं च कुर्वन्ति यथा च पितरः येभिः (यैः कर्मभिः) नः (अस्मभ्यं) सपित्वं प्रदाय (उपकारकाः आसन्) तथा शचीभिः अस्मान् आभरतम् (शिक्षतं) सततं नु अवतं च ।

TRANSLATION

O Indra and Agni (Teacher and the taught) you have force and vitality as your arms, teach us and protect us by your deeds and intellects like the rays of the sun and like fathers who were benevolent to us by giving education and useful things.

PURPORT

O men ! You should always honour that teacher who among you is illuminer of knowledge like the sun, guardian with kindness like the parents and a student who has enlightened intellect like the sun. Without this (showing due respect to the teacher and the taught) there can be no progress in the spread of knowledge.

THE COMMENTATOR'S NOTES

(इन्द्राग्नी) अध्येत्रध्यापकौ = The teacher and the taught.

(सपित्वम्) समानं च तत् पित्वं प्रापणं विज्ञानं च तत् । अत्र पि गतौ इत्यस्माद् धातोः औणादिकः त्वम् प्रत्ययः = Education given together to all pupils.

TRANSLATOR'S NOTES

Rishi Dayananda Sarasvati has interpreted इन्द्राग्नी here as अध्येत्रध्यापकौ By Indra is meant a teacher full of the great wealth of wisdom विद्यारूप परमैश्वर्ययुक्तोऽध्यापकः = as Rishi Dayananda has stated specifically in his commentary on Rig. 1. 106. 6 इन्द्रम्-परमैश्वर्यवन्तंशालाध्यक्षम् अथवा इन्द्रम्-अविद्याविदारकम् आप्तं विद्वांसम् Rig. 7. 81. 12

By Agni is here meant a student desirous of getting knowledge as stated by the Rishi in his commentary on Rig. 5. 11. 6.

अग्ने-विद्यां जिघृक्षो अगि-गतौ अत्र गतेर्ज्ञानार्थग्रहणम्

पुनस्तौ कीदृशावित्युपदिश्यते ।

How are Indra and Agni taught further in the 8th Mantra.

Mantra – 8

पुरंदरा शिक्षतं वज्रहस्तास्माँ इन्द्राग्नी अवतं भरेषु ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे पुरन्दरा वज्रहस्ता इन्द्राग्नी ! युवां यथा मित्रः वरुणः अदितिः सिन्धुः पृथिवी उत द्यौः नः मामहन्ताम् तथा अस्मान् तद् विज्ञानं शिक्षतं भरेषु अवतं च ।

TRANSLATION

O Indra and Agni Preacher and audience the destroyers of the cities of enemies in the form of ignorance, selfishness etc. O holders of the thunderbolt of knowledge and strength like hands, like the persons friendly to all, noble persons, earth, firmament, river and ocean and light of the sun etc. helping us in advancement so that we may become respectable everywhere, instruct us in all sciences and protect us in battles.

PURPORT

As friends protect and help in all round growth of their friends, being agreeable to one another, in the same manner, the preachers and audience should augment one another's knowledge and should remain always friendly with true love.

THE COMMENTATOR'S NOTES

(वज्रहस्ता) वज्रहस्तौ वज्रं विद्यारूपं वीर्यं हस्त इव ययोस्तौ । वज्रो वै वीर्यम् शत० ७. ४. २. २४ अत्रोभयत्र सुपांसु लुक् इत्याकारादेशः (इन्द्राग्नी) ।

= Holders of the thunderbolt of knowledge and force like the hands.

(इन्द्राग्नी) उपदेश्योपदेष्टारौ = The preachers and the audience.

This hymn is connected with the previous hymn as there is mention of Indra and Agni as in the previous hymn.

Here ends the commentaty on one hundred ninth hymn and 29th Varga of the first Mandala of the Rigveda.

अथ दशोत्तरशततमं सूक्तम्

HYMN CX (110)

अस्य दशोत्तर सूक्तस्य नवर्चस्य सूक्तस्याङ्गिरसः कुत्सः ऋषिः । ऋभवो देवताः । १, ४ जगती २, ३, ७ विराड् जगती । ६, ८ निचृज्जगती छन्दः । निषादः स्वरः । ५ निचृत् त्रिष्टुप्, ९ त्रिष्टुप् छन्दः । धैवतः स्वरः ।

Seer of the hymn – Kutsa Angiras. Devata or subject Ribhus. Metres–Jagati and Trishtup of various kinds. Tune–Dhaivata.

अथ विद्वांसो मनुष्याः कथं वर्तेरन्नित्युपदिश्यते ।

How should learned men behave is taught in the first Mantra.

Mantra—1

तृतं मे अपस्तदु तायते पुनः स्वादिष्ठा धीतिरुचथाय शस्यते ।
अयं समुद्र इह विश्वदेव्यः स्वाहाकृतस्य समु तृप्णुत ऋभवः ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे ऋभवः (मेधाविनो विद्वांसः) यथा इह अयं विश्वदेव्यः समुद्रः यथा च युष्माभिः स्वाहा कृतस्य उचथाय स्वादिष्ठा धीतिः शस्यते यथा उ मे ततम् अपः तायते तत् उ पुनः अस्मान् यूयं संतृप्णुत ।

TRANSLATION

O Ribhus (geniuses) as there is the ocean full of gems or divine attributes, as you have the sweetest intellect for teaching and preaching Dharma revealed through the True Vedic Speech, as the noble deed done by me protects and preserves me, in the same manner, make us fully happy again and again.

PURPORT

As the ocean full of all gems is endowed with divine attributes, in the same manner, righteous teachers should

manifest divine virtues among the people by preaching noble deeds and good intellect.

THE COMMENTATOR'S NOTES

(तायते) पालयति । अन्तर्गतोण्यर्थः = Protects.

(उचथाय) प्रवचनाय, अध्यापनाय

= For teaching and preaching.

(स्वाहाकृतस्य) सत्यवाङ् निष्पन्नस्य धर्मस्य ।

= Of the Dharma revealed through the True Vedic Speech.

(ऋभवः) मेधाविनः । ऋभुरिति मेधाविनाम अत्राह निरुक्तकारः ऋभवः उरुभान्तीति वा ऋतेन भान्तीति वा ऋतेन भवन्तीतिवा

= Geniuses who shine much with truth.

TRANSLATOR'S NOTES

तायते is from तायृ-सन्तानपालनयो: अत्रपालनार्थं ग्रहणम् उचथाय is derived from वच-परिभाषणे स्वाहेति वाङ्नाम (निघ० १. ११) ।

पुनस्ते कीदृशा इत्युपदिश्यते ।

Mantra—2

आभोगयं प्र यदिच्छन्त ऐतनापाकाः प्राञ्चो मम के चिदापयः ।
सौधन्वनासश्चरितस्य भूमनागच्छत सवितुर्दाशुषो गृहम् ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे प्रांचः अपाकाः यतयः यूयं येकेचित् मम आपयः यत् (यम्) आभोगयम् इच्छन्तः (वर्तन्ते) तान् तं प्र एतना हे सौधन्वनासः यदा यूयं भूमना चरितस्य सवितुः दाशुषः गृहम् आगच्छत (खलु तदा जिज्ञासून्प्रति सत्यधर्मग्रहणम् उपदिशत) ।

TRANSLATION

O aged Sanyasis, go to those of my kith and kin who desire to acquire knowledge and good dealing leading to

happiness. O men full of true wisdom and knowledge : When you go to the house of a man of charitable disposition who has become prosperous on account of good deeds done constantly, preach to the seekers of truth, to accept true Dharma

PURPORT

O householders, you should acquire true knowledge sitting at the feet of the Sanyasis and when you go to the assembly of liberal persons, sit there properly and behaving humbly preach knowledge and humility.

THE COMMENTATOR'S NOTES

(आभोगयम्) आसमन्तात् भोगेषु साधुं व्यवहारम् ।

= Good treatment leading to the enjoyment of happiness.

(अपाकाः) वर्जितपाकयज्ञा यतयः

(षू-प्रसवैश्वर्ययोः) = Sanyasis

(सवितुः) ऐश्वर्ययुक्तस्य = Of a rich man.

पुनस्ते कथं वर्तेरन्नित्युपदिश्यते ।

Mantra—3

तत्स॑वि॒ता वो॑ऽमृत॒त्वमासु॑व॒दगो॑ह्यं॒ यच्छ्र॒वय॑न्त॒ ऐत॑न ।
त्यं चि॑च्चम॒सम॑सु॒रस्य॒ भक्ष॑ण॒मेकं॒ सन्त॑मकृणुता॒ चतु॑र्वयम् ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

(हे बुद्धिमन्तः) यूयं यः सविता वः यत् अमृतत्वम् आसुवत तत् अगोह्यं श्रवयन्तः (सकला विद्याः) ऐतन (विज्ञापयत) असुरस्य चमसं त्यं भक्षणं चित् (इव) चतुर्वयम् एकम् अकृणुत ।

TRANSLATION

O wisemen : When a learned man giving you the wealth of wisdom leads you to immortality, then revealing

the knowledge that can not be concealed, spread it to all. Like the cloud that eats the light of the sun, make the person who is engrossed in the enjoyment of life, follow the fourfold path of Dharma (righteousness and duty) Artha (Wealth) Kama (fulfilment of noble desires) and Moksha (emancipation).

PURPORT

O learned men, as a cloud gladdens all by giving water and nourishing food materials etc. so you should benefit all students by making them truly learned persons.

THE COMMENTATOR'S NOTES

(सविता) ऐश्वर्यप्रदोविद्वान्

= A learned man giving wealth of wisdom.

(चमसम्) चमन्त्यस्मिन् मेघे

(चतुर्वयम्) चत्वारो धर्मार्थकाममोक्षा वया व्याप्तव्या येन तम् ।

= He who pervades fourfold path of Dharma, Artha, Kama and Moksha.

पुनस्ते कीदृशा इत्युपदिश्यते

How are the Ribhus is taught in the fourth Mantra.

Mantra—4

विष्ट्वी शमी तरणित्वेन वाघतो मर्तासः सन्तो अमृतत्वमानशुः ।
सौधन्वना ऋभवः सूरचक्षसः संवत्सरे समपृच्यन्त धीतिभिः ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

ये सौधन्वना सूरचक्षसः वाघतः मर्तास ऋभवः संवत्सरे धीतिभिः सततं पुरुषार्थयुक्तैः कर्मभिः कार्यसिद्धि समपृच्यन्त (सम्यक्पृचंति) ते तरणित्वेनः विष्ट्वी शमी कुर्वन्तः सन्तः अमृतत्वं (मोक्षभावम्) आनशु (शक्नुवन्ति) ।

TRANSLATION

Men full of good knowledge and wisdom, brilliant as the sun, doing noble deeds, being mortals, soon acquire immortality through those benevolent acts.

PURPORT

Those men who are always engaged in doing noble deeds industriously, enjoy happiness and emancipation, Lazy persons can never enjoy true delight.

THE COMMENTATOR'S NOTES

(विष्ट्वी) व्यापनशीलानि= Pervasive.

(शमी) कर्माणि विष्ट्वीशमीत्येतद्द्वयं कर्मनाम(निघ० २. १)

(तरणित्वेन) शीघ्रम्= Soon.

(सौधन्वनाः) शोभनविज्ञानाः
= Full of good knowledge.

(धीतिभिः) कर्मभिः

TRANSLATOR'S NOTES

तरणिरिति क्षिप्रनाम (निघ० २. १८) सौधन्वनाः is derived from धाव-गतौ गतेस्त्रयोऽर्थाः ज्ञानं गमन प्राप्तिश्च Here the first meaning of ज्ञान or knowledge has been taken. It is wrong to take सौधन्वनाः as the sons of Sudhanvan as it is against the fundamental principles of the Vedic terminology as pointed out before. Unfortunately Sayanacharya. Prof. Wilson, Griffith and many other translators have committed the same mistake.

पुनस्ते कीदृशा इत्युपदिश्यते

How are Ribhus is taught further in the fifth Mantra.

Mantra—5

क्षेत्रमिव वि ममुस्तेजनेनँ एकं पात्रमृभवो जेहमानम् ।
उपस्तुता उपमं नाधमाना अमर्त्येषु श्रव इच्छमानाः ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

ये उपस्तुता नाधमाना अमर्त्येषु श्रव इच्छमानाः ऋभवः (मेधाविनः) तेजनेन क्षेत्रम् इव जेहमानम् एकम् उपमं पात्रं विममुः (विविधं मान्ति ते सुखं प्राप्नुवन्ति) ॥

TRANSLATION

Those Ribhus (Geniuses) enjoy happiness who lauded by the by standers soliciting the food (of knowledge) among the immortals (enlightened persons who know their soul to be immortal) measure out like the field, their own unique knowledge which leads to industriousness in various ways.

PURPORT

As men enjoy happiness by ploughing the field by sowing seeds, preserving and guarding them and by obtaining foodstuff, in the same manner, people enjoy happiness by manufacturing good vehicles, by sitting and moving them and taking them to distant places for business and by ruling over them, thus earning much wealth.

THE COMMENTATOR'S NOTES

(पात्रम्) पात्राणां-ज्ञनानां समूहः
= The band of knowledge.

(श्रवः) अन्नम् (नाधमानाः) नाधृ-याञ्चोपतापैश्वर्याशीःषु ॥
= Food (of knowledgd).

अथ सूर्यकिरणाः कीदृशा इत्युपदिश्यते ।

How are the rays of the sun is taught in the sixth Mantra.

Mantra—6

आ मनीषामन्तरिक्षस्य नृभ्यः स्रुचेव घृतं जुहवाम विद्मना ।
तरणित्वा ये पितुरस्य सश्चिर ऋभवो वाजमरुहन्दिवो रजः ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

ये ऋभवः तरणित्वा वाजम् अरुहन् दिवः रजः सश्चिरे। अस्य अन्तरिक्षस्य मध्येवर्तमानाः नृभ्यः स्रुचा इव घृतं पितुः अन्नं च सश्चिरे तेभ्यः वयं विद्मना मनीषाम् आजुहवाम ।

TRANSLATION

These rays of the sun, which soon reach the earth and corn, which reach various worlds in the sky, being in the

firmament, they cause men to attain water or clarified butter, like the ghee with a ladle. From them, with knowledge we take intellect. [By the proper use of the sun, a man becomes healthy and wise.]

PURPORT

As the rays of the sun make all people happy by ascending various worlds, raining down water and generating herbs, in the same manner, kings and other officers of the State should make all people delighted by their good conduct and behaviour.

THE COMMENTATOR'S NOTES

(घृतम्) उदकम् आज्यं वा
= Water or Ghee (Clarified butter).
(ऋभवः) किरणाः आदित्यरश्मयोऽपि ऋभवः उच्यन्ते (नि० ११. १६)
(वाजम्) पृथिव्यादिकमन्नम् ।

TRANSLATOR'S NOTES

घृतमिति उदकनाम (निघ० १. १२)
वाज इति अन्नम (निघ० २. ७)
पुनर्विद्वानस्मदर्थं केन किं कुर्यादित्युपदिश्यते ।

What should a learned man do and by what means is taught further in the 7th Mantra.

Mantra—7

ऋभुर्न इन्द्रः शवसा नवीयानृभुर्वाजेभिर्वसुभिर्वसुर्ददिः ।
युष्माकं देवा अवसाहनि प्रियेऽभि तिष्ठेम पृत्सुतीरसुन्वताम् ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

यः नवीयान् ऋभुः यथा इन्द्रः तथा शवसा नः (अस्मभ्यम्) । सुखं प्रयच्छेत् ऋभुः वाजिभिः वसुभिः वसुः ददिः तेन (स्वराज्यसेनानाम्) अवसा सह देवाः वयम् प्रिये

अहनि असुन्वतां (युष्माकं सेनानाम्) पृत्सुतीः सेनाः अभितिष्ठेम (अभि भवेम-सदा तिरस्कुर्याम) ॥

TRANSLATION

An ever new Ribhu (genius) who is illuminator of various sciences like the sun with the strength of wisdom and good education may bestow happiness on us. We may with a genius who is manifester of true civilisation, being himself always happy and giver of happiness, with knowledge and food, overcome the prosperous hosts of the wicked persons, who do not perform Yajnas, through your protection O enlightened persons, on a suitable or favourable day.

PURPORT

As the bright sun gladdens all with his light and in a way, infuses new life in them, in the same manner, let us subdue all enemies with their armies, by our own well-trained strong forces being endowed with educated, heroic expert assistants or companions.

TRANSLATOR'S NOTES

(ऋभुः) (१) बहुविद्याप्रकाशको विद्वान्
(२) आयुः सभ्यता प्रकाशकः

(1) A learned man illuminator of various sciences.
(2) A genius who manifests the way of long life and true civilistation.

(इन्द्रः) यथा सूर्यः = Like the sun.

TRANSLATOR'S NOTES

अथो यः स इन्द्रोऽसौ स आदित्यः (शत० ८. ५. ३. २)
एष एवेन्द्रो य एष (सूर्यः) तपति (शत० १. ६. ४. १८)
पुनर्विद्वांसः किं कुर्युरित्युपदिश्यते

What should learned men do is taught in the 8th Mantra.

Mantra—8

निश्चर्मण ऋभवो गामपिंशत सं वत्सेनासृजता मातरं पुनः ।
सौधन्वनासः स्वपस्यया नरो जिव्री युवाना पितराकृणोतन ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे ऋभवः (मेधाविनः मनुष्याः) यूयं चर्मणः गां, निरपिंशत वत्सेन पुनः मातरं समसृजता । हे सौधन्वनासः नरः यूयं स्वपस्यया जिव्री (वृद्धौ) पितरा युवाना अकृणोतन ॥

TRANSLATOR

O Ribhus (Geniuses) you strengthen the cow which has become very weak and in which only skin has remained and re-unite the Mother (cow) with the calf. O experts in the science of archery, through your good works you render your aged parents leading good lives young-make them strong like young people by serving and feeding them well.

PURPORT

Without such acts of making the cattle strong and serving the aged parents, none can rule over a State well. Therefore, all such good deeds must be performed well by all.

अथ सेनाध्यक्षः कीदृश इत्युपदिश्यते ।

How should a commander of the army be is taught in the 9th Mantra.

Mantra—9

वाजेभिर्नो वाजसातावविड्ढ्यृभुमाँ इन्द्र चित्रमा दर्षि राधः ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे इन्द्र ऋभुमान् त्वं नः यत् राधः मित्रः वरुणः अदितिः सिन्धुः पृथिवी उत द्यौः मामहन्तां तत् चित्रं राधः

अविड्ढ नः (अस्मान्) च वाजेभिः वाजसातौ आर्विष (समन्तात् आदरयुक्तान् कुरु)।

TRANSLATION

O most prosperous Commander of the army, you who are a great genius and are associated with such wise men, supply us at the time of war with food-stuffs and wonderful wealth. Make us most respectable like the persons friendly to all, noble men, earth, firmanent, river, ocean, and light of the sun.

PURPORT

No commander of the army can vanquish his enemies without the help of wise men.

This hymn is connected with the previous hymn as there is mention of the attributes and actions of wise men as in the previous hymn.

Here ends the commentary on the 110th. hymn and 31st Varga of the first Mandala of the Rigveda.

अथैकादशोत्तरशततमं सूक्तम्

HYMN - CXI (111)

अथ पंचर्चस्यैकादशोत्तरशततमस्य सूक्तस्यांगिरसः कुत्स ऋषिः । ऋभवो देवताः १–४ जगती छन्दः निषादः स्वरः । ५ त्रिष्टुप् छन्दः । धैवतः स्वरः ।

Seer of the hymn — Angirasa Kutsa. Devta Ribhus, Metres Jagati and Trishtup. Tunes Nishada and Dhaivat.

अथ शिल्पकुशला मेधाविनः किं कुर्युरित्युपदिश्यते ।

What should artisan geniuses do is taught in the first Mantra.

Mantra—1

तक्षन्रथं सुवृतं विद्मनापसस्तक्षन्हरी इन्द्रवाहा वृषण्वसू ।
तक्षन्पितृभ्यामृभवो युवद्वयस्तक्षन्वत्साय मातरं सचाभुवम् ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृत:)

ये पितृभ्यां युक्ता विद्मनापसः ऋभवः (मेधाविनः जनाः) वृषा वसूहरी इन्द्रवाहा तक्षन् सुवृतं रथं तक्षन् वयः तक्षन् वत्साय सचाभुवं मातरं युवत् तक्षन् (ते अधिकम् ऐश्वर्यं लभरेन्) ॥

TRANSLATION

Those Ribhus (Artisan genuises) possessed of skill and wisdom in their works, associated with gaurdians and teachers, construct a well-built car in the form of aeroplane etc. they use with subtle intellect water and fire which generate electricity and lead to great wealth carrying mighty persons educated and active. They expand life. They give youthful vigour to their parents, they unite mother full of knowledge with her son.

PURPORT

Men cannot make progress in arts and industries unless after examining and testing the the attributes of the effects, they go to the cause.

THE COMMENTATOR'S NOTES

(पितृभ्याम्) अधिष्ठातृशिक्षकाभ्याम् – पा-रक्षणे इति धातोः = Guardians and teachers.

(हरी) हरणशीलौ जलाग्न्याख्यौ = Water and fire.

(इन्द्रवाहा) यौ इन्द्रं विद्युतं परमैश्वर्यं वहतस्तौ = Which generate electricity and lead to great wealth.

पुनस्ते कीदृशाइत्युपदिश्यते ।

How are they (Ribhus) is taught further in the second Mantra.

Mantra—2

आ नो॑ यज्ञाय॑ तक्षत ऋभुमद्वय॑: क्रत्वे॒ दक्षा॑य सुप्रजाव॑तीमिष॑म् ।
यथा॒ क्षया॑म सर्व॑वीरया विशा॒ तन्न॑: शर्धा॑य धासथा॒ स्वि॑न्द्रियम् ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे ऋभवः ! यूयं नः (अस्माकम्) यज्ञाय क्रत्वे दक्षाय ऋभुमत् वयः सुप्रजावतीम् इषं च अतक्षत यथा वयं सर्ववीरया विशा क्षयाम (तथा यूयम् अपि प्रजया सह निवसत) यथा वयं शर्धाय स्विन्द्रियं दध्याम तथा यूयम् अपि नः (अस्माकं) शर्धाय तत् स्विन्द्रियं धासथ ॥

TRANSLATION

O Ribhus (arrisan geniuses) prepare fully for our Yajna in the form of Industrial and Technological work, for our intelligence and the work of Justice for our strength;

such nutritious desirable food as may be the cause of excellent progeny, so that we may live surrounded by vigorous people. Confer upon us this such excellent knowledge and wealth for our strength.

PURPORT

Highly learned men should live lovingly with ordinary people; not highly educated and ordinary persons should live with love with highly educated people. Without this, it is not possible to make progress in arts and industries, to augment the strength of the people and to have good progeny.

THE COMMENTATOR'S NOTES

(यज्ञाय) संगतिकरणाख्यशिल्पक्रियासिद्धये

= For the accomplishment of the Yajna in the form of Industrial or artistic work.

(इन्द्रियम्) विज्ञानं धनं वा = Good knowledge or wealth.

TRANSLATOR'S NOTES

इन्द्रियम् इति धननाम (निघ० २. १०)

इदि—परमैश्वर्ये इति धातोरिन्द्रियम् विज्ञानरूपं परमैश्वर्यम् विद्याधनं सर्वधनप्रधानम् इति भर्तृहरिकृतनीतिशतके ।

पुनस्ते किं कुर्युरित्युपदिश्यते ।

How are Ribhus is taught further in the third Mantra.

Mantra—3

आ तक्षत सातिमस्मभ्यमृभवः सातिं रथाय सातिमर्वते नरः ।

सातिं नो जैत्रीं सं महेत विश्वहा जामिमजामिं पृतनासु सक्षणिम् ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे ऋभवः नरः यूयं अस्मभ्यं विश्वहा रथाय सातिम् अर्वते च सातिम् आतक्षत पृतनासु सातिम् जामिम् अजामि सक्षणि शत्रुं जित्वा नः (अस्मभ्यम्) जैत्रीं साति संमहेत ॥

TRANSLATION

O Ribhus (geniuses-leaders of knowledge or learned persons) bestow upon us the gift of knowledge. Bestow upon us ample sustenance for the construction of aircraft and other chariots. Bestow upon us the knowledge for the welfare of horses. Let every one daily acknowledge our victorious wealth, and may we triumph in battles over our mighty foes whether they are well-known or otherwise.

PURPORT

Let us always honour those learned persons who are our protectors and conquerors of all enemies. (Whether internal and external).

THE COMMENTATOR'S NOTES

(सातिम्) विद्यादिदानम्=The gift of knowledge etc.
(सातिम्) संविभागम्, अश्वशिक्षाविभागम्
= Division or department. Tr.
(जामिम्) प्रसिद्धम् = Well-known.
(अजामिम्) अप्रसिद्धं वैरिणम् = An enemy who is not so well-known.

TRANSLATOR'S NOTES

The word साति is derived from षणु-दाने and संभक्तौ hence the two different meanings given by Rishi Dayananda Sarasvati as quoted above, The Jami (जामि) is derived from जनी-प्रादुर्भावे hence the meaning of प्रसिद्धम् or Well-known as given by Rishi Dayananda. It is remarkable that Sayanacharya has

interpreted रथाय as रंहण शीलायपुत्रादये = for active children besides अश्वायैव वा horses.

एतान् किमर्थं सत्कुर्यामित्युपदिश्यते

Why should we honour Ribhus is taught further in the fourth Mantra.

Mantra—4

ऋभुक्षणमिन्द्रा हुव ऊतयं ऋभून्वाजान्मरुतः सोमपीतये ।
उभा मित्रावरुणा नूनमश्विना ते नो हिन्वन्तु सातये धिये जिषे ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

अहम् ऊतये ऋभुक्षणम् इन्द्रम् आहुवे । अहं सोमपीतये मरुतः ऋभून् आह्वये । अहम् उभा मित्रावरुणा अश्विना हुवे ये धिये सातयेशत्रून् जिषे नः (अस्मान्) विज्ञापयन्तु वर्द्धयितुं शक्नुवन्तु ते विद्वांसः नः (अस्मान्) हिन्वन्तु ॥

TRANSLATION

I invoke for protection the mighty Indra (the lord of wealth of wisdom etc.) who teaches or makes arrangements for the residence and sustenance of the Ribhus or wise men. I invoke for Yajna (where Soma the essence of nourishing herbs is drunk) Ribhus (geniuses) Vajas (men superior in knowledge, Maruts (Priests) Mitra Varuna (men friendly to all and the best) and Ashvins teachers and the taught who pervade in all good qualities i.e. are virtuous. May they teach us for the acquirement of knowledge, for distribution of wealth and for the victory over our enemies and thus enable us to grow harmoniously.

PURPORT

Those who serve absolutely truthful learned men who are also experts in various arts, why should not they grow ever more after receiving good education and wisdom and conquering their foes ?

THE COMMENTATOR'S NOTES

(ऋभुक्षणम्) यः ऋभून् मेधाविनः क्षाययति निवासयति ज्ञापयति वा तम् ।

=He who teaches or makes arrangements for the residence of wise men.

(वाजान्) ज्ञानोत्कृष्टान्=Men superior in knowledge.

(मरुतः) ऋत्विजः = Priests.

(अश्विना) सर्वशुभगुण व्यापनशीलौ अध्यापकाध्येतारौ=The teachers and the taught prevading in all good qualities i e. virtuous.

TRANSLATION

ऋभुरिति मेधाविनाम (निघ० ३. १५)

क्षि-निवासगत्योः ।

The word वाज is derived from वज-गतौ-गतेस्त्रयोऽर्थाः ज्ञानं गमनं प्राप्तिश्च here the first meaning of knowledge has been taken, hence the interpretation of वाजान् as ज्ञानोत्कृष्टान् or superiors in knowledge,

मरुतः इति ऋत्विङ्नाम (निघ० ३.१८) = Priests

हि - गतिवृद्ध्योः Hence both meanings of the verb हि have been taken as विज्ञापयन्तु वर्द्धयन्तु. Among the three meanings of गति the first meaning of ज्ञान or knowledge has been taken here.

पुनः स मेधावी नरः किं कुर्यादित्युपदिश्यते ।

What should a genius do is taught further in the fifth Mantra.

Mantra—5

ऋभुर्भराय सं शिशातु सातिं समर्यजिद्वाजो अस्माँ अविष्टु ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

(हे मेधाविन्) सम् अर्यजित् ऋभुः वाजः (भवान्) भराय शत्रून् संशिशातु अस्मान् अविष्टुः तथा नः (अस्मदर्थम्) यत् मित्रः, वरुणः अदितिः सिन्धुः पृथिवी उत द्यौः मामहन्ताम् (तथा एव भवान्) तत् तां साति नः (अस्मदर्थम् निष्पादयतु) ॥

TRANSLATION

O talented learned man, you who are quick in action and movement and conqueror of your enemies, be victorious in battles and protect us. May persons who are friendly to all and noble, the earth, firmament, ocean and heaven make us respectable everywhere.

PURPORT

The paramount duty of learned persons is to enable all seekers after truth who are not so learned, to grow more and more by the gift of good education and wisdom. As friendly persons or Prana etc. make all happy by augmenting their knowledge and strength, scholars should also do likewise.

THE COMMENTATORS'S NOTES

(समर्यजित् यः समर्यान् संग्रामान् जयति सः) समर्ये इति संग्रामनाम (निघ० २. १७)
=Conqueror in battles.

(वाजः) वेगादिगुणयुक्तः = Quick or active from वज-गतौ. This hymn is connected with the previous hymn as there is mention of the attributes of talented persons in this as in that hymn.

Here ends the commentary on the 111th hymn and 32nd Varga of the first Mandala of the Rigveda.

अथ द्वादशोत्तरशततमं सूक्तम्

HYMN CXII (112)

अस्य पंचविंशत्यृचस्य द्वादशोत्तरशततमस्य सूक्तस्यांगिरसः कुत्स ऋषिः। आदिमे मन्त्रे प्रथमपादस्य द्यावापृथिव्यौ द्वितीयस्याग्निः शिष्टस्य सूक्तस्याश्विनौ देवते। १, २, ६, ७, १३, १५, १७, १८, २०, २१ निचृज्जगती। ४, ८, ९, ११, १२, १४, १६, २३ जगती १९, विराड् जगती छन्दः। निषादः स्वरः। ३, ५, २४, विराट् त्रिष्टुप् छन्दः। १० भुरिक् त्रिष्टुप्। २५ त्रिष्टुप् छन्दः। धैवतः स्वरः।

Seer of the hymn - Angirasa Kutsa.
Devata-Dyava Prithivyau-Ashvinau.

तत्रादौ द्यावाभूमिगुणा उपदिश्यन्ते।

The attributes of the heaven and earth are taught in the first Mantra.

Mantra—1

ईळे द्यावापृथिवी पूर्वचित्तयेऽग्निं घर्मं सुरुचं यामन्निष्टये।
याभिर्भरे कारमंशाय जिन्वथस्ताभिरू षु ऊतिभिरश्विना गतम्।

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे अश्विना सर्वविद्याव्यापिनौ अध्यापकोपदेशकौ भवन्तौ यथा यामन् पूर्वचित्तये इष्टये द्यावापृथिवी याभिः ऊतिभिः भरे घर्मं सुरुचम् अग्निं (प्राप्नुतः) ताभिः अंशाय कारं सु जिन्वथः (कार्यसिद्धये आगतम्) इति अहम् ईडे।

TRANSLATION

O Ashivinau (Teachers and preachers who pervade all sciences - are experts in all sciences) I praise you for the achievement of all desirable happiness in the world, as the hot and bright shining Agni (electricity) is praised for its attributes As an active man is invited for the discharge of

the share of his duty, so I invite you sincerely. Please come for the accomplishment of the noble task with all your protection, in the battle of life.

PURPORT

O men, as the sun and the earth support the whole world and uphold it when united with electricity, so you should also do likewise, supporting and sustaining all people.

THE COMMENTATOR'S NOTES

(अग्निम्) विद्युतम् = Electricity.

(इष्टये) इष्टसुखाय = For desirable happiness.

(जिन्वथः) प्राप्नुतः जिन्वतीति गतिकर्मा (निघ० २.१४) = Attain.

(अश्विना) विद्याव्यापनशीलौ – अध्यापकोपदेशकौ = The teachers and preachers-experts in all sciences.

(अशूङ्-व्याप्तौ)

अध्यापकोपदेशकविषयमाह

The duties of the teachers and the preachers are taught in the 2nd Mantra.

Mantra—2

युवोर्दानाय सुभरा असश्चतो रथमा तस्थुर्वचसं न मन्तवे ।
याभिर्धियोऽवथः कर्मन्निष्टये ताभिरू षु ऊतिभिरश्विना गतम् ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे अश्विना सुभरा असश्चतः जनाः मन्तवे वचसं न युवोः यं रथम् अतस्थुः ते नः याभिः ऊतिभिः च युवां दानाय सु आगतम् (अस्मान् प्रति श्रेष्ठतया आ गच्छतम्) ॥

TRANSLATION

O teachers and preachers who are givers of knowledge, persons who uphold and sustain people well, who are free from evils and are earnest, sit with you in your Car and listen to you attentively, as disciples listen to the words of an admirable teacher for instruction. Please come to us gracefully for giving us delight with all your protections, with which you preserve intellect in every noble deed.

THE COMMENTATOR'S NOTES

(अश्विना) विद्यादातारौ अध्यापकोपदेशकौ

= Teachers and preachers who are givers of knowledge.

(असश्चतः) असमेता दुर्व्यसनेभ्यः

= Free from all vices.

पुनस्तमेव विषयमाह ।

The same subject is continued :

Mantra—3

युवं तासां दिव्यस्य प्रशासने विशां क्षयथो अमृतस्य मज्मना ।
याभिर्धेनुमस्वं पिन्वथो नरा ताभिरू षु ऊतिभिरश्विना गतम् ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे नरा अश्विना युवं दिव्यस्य अमृतस्य मज्मना सह याः तत्सम्बन्धे प्रजाः सन्ति तासां दिशां प्रशासने क्षयथः उ याभिः ऊतिभिः अस्वं धेनुं पिन्वथः ताभिः स्वागतम् ॥

TRANSLATION

O leading teachers and preachers, you dwell in ruling over the subjects who are connected with the power of the Divine Immortal Supreme Being. Please come to us with your protective powers with which you use the speech that does not generate any evil thought or action.

PURPORT

Blessed are those scholars who please the people for the multiplication of wisdom, good education and happiness.

THE COMMENTATOR'S NOTES

(मज्मना) बलेन = With the Power.

मज्मना बलनाम (निघ० २.६) Tr.

(धेनुम्) वाचम् = Speech.

(अस्वम्) या दुष्कर्म न सूते नोत्पादयति ताम्

= That which does not generate evil thought or action.

धेनुरिति वाङ्नाम (निघ० १.११) Tr.

पुनस्तौ कीदृशावित्युपदिश्यते ।

Mantra—4

याभिः परिज्मा तनयस्य मज्मना द्विमाता तूर्षु तरणिर्विभूषति ।
याभिस्त्रिमन्तुरभवद्विचक्षणस्ताभिरू षु ऊतिभिरश्विना गतम् ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे अश्विना युवां याभिः ऊतिभिः द्विमाता तूर्षु तरणिः परिज्मा वायुः तनयस्य मज्मना सु विभूषति उ याभिः ऊतिभिः त्रिमन्तुः विचक्षणः अभवत् (भवेत्) ताभिः ऊतिभिः सर्वान् अस्मान् (विद्यादानाय) आगतम् ।

TRANSLATION

Please come to us with those protective powers with which the circumambient wind endowed with the vigour of its son (fire), the measurer of fire and water and swiftest of the swift, beautifies all things and by which the knower of Jnana, (knowledge) Karma (action) and Upasana (Communion) becomes a wonderful guide.

PURPORT

Men should diffuse knowledge with love like the very life and with the benevolent spirit of the Sanyasis.

THE COMMENTATOR'S NOTES

(परिज्मा) परितः सर्वतो गन्ता (वायुः)

= Wind that goes in all directions.

अत्र (त्रिमन्तुः) तिसृणां कर्मोपासनाज्ञानविद्यानां मन्तुः-मन्ता ।

= Knower of the three-action, communion and knowledge.

TRANSLATOR'S NOTES

The word परिज्मा is from परि-अज-गति क्षेपणयोः परिपूर्वकादज-गतिक्षेपण-योरित्यस्मात् श्वन्नुक्षन्नित्यादौनिपात्यते The word is used also for a Sanyasi, who goes from place to place for preaching Dharma. Rishi Dayananda Sarasvati hints at this second meaning in his Bhavarth or purport saying मनुष्यैः सन्यासिवदुपकारकत्वेन सर्वेभ्यो विद्योन्नतिः सम्पादनीया ॥

Sayanacharya, Prof. Wilson and Griffith take सुमन्तु (Sumantu) to be the name of Kaksheevan. Sayanacharya interprets it is त्रयाणां मन्ता त्रिविधेषु पाकयज्ञ हविर्यज्ञ सोम यज्ञेष्वासादित ज्ञानः कक्षीवान् = Kakshevan who had acquired knowledge of three kinds of Yajnas which Griffith translates as the sapient one acquired his triple lore, explaining in the footnote.

"Knowledge of sacrificial food, oblations of the clarified butter, and libations of Soma Juice. But he frankly adds"– 'The meaning of the passage is uncertain.' Rishi Dayananda Saraswati's interpretation of सुमन्तुः has been quoted above which is quite correct as तिसृणां कर्मोपासना ज्ञानविद्यानां मन्तुमन्ता The knower of the Sciences of Karma, Upasana and Jnana as it is derived from मनु-अवगमे ।

पुनस्तौ कीदृशावित्युपदिश्यते ।

How are they (Ashvinau) is taught further in the fifth Mantra.

Mantra—5

याभी रेभं निवृतं सितमद्भ्य उदृन्दनमैरयतं स्वर्दृशे ।

याभिः कण्वं प्र सिषासन्तमावतं ताभिरू षु ऊतिभिरश्विना गतम् ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे अश्विना युवां याभिः ऊतिभिः सितं निवृतं रेभं वन्दनं स्वर्दृशे अद्भ्यः उदैरयतं याभिः च सिषासन्तं कण्वं प्रावतं ताभिः उ स्वागतम् ॥

TRANSLATION

O teachers and preachers possessing self-control ! Come to us willingly with those protective powers, by which you raise from the waters of difficulties a devotee who is admirer of the pure Dharma, the Shastric knowledge and the glorification of God, to behold the path of happiness, by which you protect a genius who desires to distribute his wealth and knowledge among the needy.

PURPORT

Those people who grow ever more by protecting learned persons, having acquired spiritual knowledge from them and put into use the industrial knowledge from the water and other elements, enjoy all kinds of happiness.

THE COMMENTATOR'S NOTES

(रेभम्) स्तोतारम् = Admirer.

(निवृतम्) नितरां स्वीकृतं शास्त्रबोधम्
= The Shastric Knowledge that has been accepted as true.

(सितम्) शुद्धधर्मम्
= Pure Dharma or righteousness.

कण्व इति मेधाविनाम (निघ० ३.१५)

रेभ इति स्तोतृनाम (निघ० ३.१६)

वदि-अभिवादनस्तुत्योः

It is wrong on the part of Sayanacharya, Prof. Wilson, Griffith and others to take Rebha, Vandana and Kanva as the names of particular persons instead of taking them as general terms denoting certain attributes as their derivation

and the quotation from the Nighantu (Vedic Lexicon) clearly denote.

पुनस्तौ कीदृशावित्युपदिश्यते ।

How are they (Ashvinau) is taught further in the sixth Mantra.

Mantra—6

याभिरन्तकं जसमानमारणे भुज्युं याभिरव्यथिभिर्जिजिन्वथुः ।
याभिः कर्कन्धुं वय्यं च जिन्वथस्ताभिरू षु ऊतिभिरश्विना गतम् ॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

हे अश्विना युवां याभिः ऊतिभिः आरणे अन्तकं जसमानम् याभिः अव्यथिभिः भुज्युं च जिजिन्वथुः याभिः कर्कन्धुं वय्यं च जिन्वथुः ताभिः ऊतिभिः ऊ स्वागतम् ॥

TRANSLATION

O President of the Assembly and commander of the Army who possess self-control ! Please come to us willingly with those protective powers by which you protect a destroyer of miseries and a killer of enemies in a battle, by which inflicting no distress, you preserve a sustainer or nourisher of people, by which you satisfy a man who gives work to many persons by employing them and to a scholar who knows many sciences.

PURPORT

Without guardians and protectors, the worriors cannot fight in the battle with their enemies and they cannot preserve the people. Those who do not protect learned persons by making proper arrangements, are defeated and cannot rule over a State properly.

THE COMMEN TTOR'S NOTES

(अन्तकम्) दुःखनाशकर्तारम्
= Destroyer of miseries.

(जसमानम्) शत्रून् हिंसन्तम् = Slaying the foes.

(भुज्युम्) पालकम् = Protector or sustainer.

(कर्कन्धुम्) कारुकान अन्तति-व्यवहारे बध्नाति तम्।

= One who employs many artisans in a business.

(वय्यम्) ज्ञातारम् = Knower or many sciences.

अत्र बाहुलकाद् गत्यर्थाद् वयधातोर्यत् प्रत्ययः

TRANSLATOR'S NOTES

जसमान	is from	जसु-हिंसायाम् चुः
भुज्युम्	is from	भुज-पालनाभ्यवहारयोः
अन्तक	is from	अति-बन्धने
वय्यम्	is from	वय - गतौ गतेस्त्रयोऽर्थाः ज्ञानंगमनं

प्राप्तिश्च अत्र ज्ञानार्थं ग्रहणाद्वय्यं-ज्ञातारमिति व्याख्या

It is therefore wrong on the part of Sayanacharya, Prof. Wilson, Griffith and others to take Antaka, Jasamana, Bhujyu and Vayya as the names of certain persons instead of taking them as common nouns denoting certain attributes as the Vedic Terminology requires.

पुनस्तौ कीदृशावित्युपदिश्यते।

How is they (Ashvinau) is taught further in the seventh Mantra.

Mantra—7

याभिः शुचन्तिं धनसां सुषंसदं तप्तं घर्ममोम्यावन्तमत्रये।
याभिः पृश्निगुं पुरुकुत्समावतं ताभिरू षु ऊतिभिरश्विना गतम्॥

सन्धिच्छेदसहितोऽन्वयः (ऋषिकृतः)

